श्रीगणेशायनमः आदिनारायणोब्रह्मविष्णुरुद्रादिदेवताः यस्यानुवर्तिनस्तस्मैनमोगोलोकवासिने १ अथात्रबृहज्ज्योतिषार्णवग्रंथनिबंधनकर्तीधर्मस्कंधातर्गतंचतुर्थमासमाहात्म्यस्तवकंचिकीर्षुरशेषप्रत्यूहव्यूहव्यपोहायाभिमनदेवतानमस्कारलक्षणंमंगलमाचरति वृषेतिवृषः मूषकः वाहनंयस्यसचासौविघ्नेशश्चतथर्मोवृषोवृषः श्रेष्ठोवृषोगौर्मूषकोवृषइतिशब्दरत्नप्रदीपकोशः ततः उपासनास्तबककथनानंतरंशेषंस्पष्ट १ २ तेषांमासानांमाहात्म्यंतस्यविबुद्धयेज्ञानाय ३ अयमध्यादिद्वादशमासानानामान्याह मधुरितिमन्यतेजानातीतिमधुः मनिजनिभ्यांधातौचेत्युः

श्रीगणेशायनमः वृषवाहनविघ्नेशंशिखिवाहांसरस्वतीम् स्वेष्टंश्रीबटुकंनत्वापितरंव्यंकटंनतः १ श्रीगौतमकुलोत्पन्नोज्योतिर्विद्व्यंकटात्मजः हरिकृष्णःकरोम्यत्रमासमाहात्म्यसंग्रहम् २ पुराणादीनिचालोक्यतन्माहात्म्यविबुद्धये तत्रादौकिंचिदेवात्रमासनिर्णयउच्यते ३ मधुस्तथामाधवसज्ञकश्चशुक्रः शुचिश्चायनभोनभस्यौ तथैषऊर्जश्चसहःसहस्योनपत्नपस्याविनितेक्रमेण ४ यस्मिन्मासेपौर्णमासीयेनाधिष्ण्येनसयुता तन्नक्षत्राह्वयो मासःपौर्णमासीतद्वाह्वया ५ तद्यथा चैत्रवैशाखज्येष्ठाश्चत्याशाढःश्रावणस्तथा भाद्रपदश्चाश्विनश्चकार्तिकोमार्गशीर्षकः पौषोमाघःफाल्गुनेतिमासनामानिचक्रमात् ६

मधुरेवमाधवः ज्ञानवान्प्रज्ञादित्वादण् शोचंतिपांयाच्छत्रशुक्रः अत्युष्णात्नान् शोचंतिपांयाच्छत्रशुचिः अत्यासासात् नभ्यस्तिहिनस्तिपांयानितिनभः नभसिसाधुः नभस्यइष्यतेगमयंतिपांथानिनीषः ऊर्ज्जयंति बलिनोभवंतिप्राणिनोत्रऊर्ज्जः सहतेइतिसहःअच् सहतेलोकोस्मिन्नृशीतमितिसहाःसहसिसाधुः सहस्यः नपतीतिनपाः नपसिसाधुःतपस्यः एवंमासशब्दार्थोबोध्यः ४ येनाधिष्ण्येननक्षत्रेणसयुतापौर्णमासीतन्नक्षत्रनाम्नामासः प्रोक्तः पौर्णमासीपूर्णिमा अथतन्नामकीर्त्तयाययथा चित्रानक्षत्रेणयुक्ता पौर्णमासीचैत्री सास्मिन्मासइतिसमासश्चैत्रः नक्षत्रेणयुक्तः कालः इतिअणि सास्मिन् पौर्णमासीतिपुनरण् एवंसर्वत्रबोध्यम् ५ ६

मासानांभेदञ्चतुष्टयमाह दर्शावधिर्मासः चांद्रसंज्ञकः रवेश्चिवासरैःत्रिंशद्दिनैः सावनसंज्ञकः सूर्यसंक्रांतिभोगेनसौरमासः प्रतिदिनमेकैकंक्रमेण अश्विनीमारभ्यरेवत्यंत चंद्रस्यसप्तविंशतिनक्षत्रभोगेननाक्षत्रमासः ७ अथप्रत्येकमासानांकृत्यमाह वर्षायनर्तुयुगपूर्वकमितितुहिनांशुमा नात् चंद्रमानात् तथाचार्ष्टिषेणिः विवाहादौस्मृतः सौरोयज्ञादौसावनः स्मृतः वार्षिकेपितृकार्यंचमासश्चांद्रोविधीयते स्कंदे सौरमाश्युदयेमा

चांद्रोदर्शावधिर्मासः सावनःरविवासरैः सौरोर्कराशिभोगेननाक्षत्रोविधुभैःक्रमात् ७ शिरोमणौ वर्षायनर्तुयुगपूर्वकमत्रसौरान्मासास्तथाचतिथ्यृक्षर्तुहिनांशुमानात् यत्कुच्छ्रसूतकचिकित्सितवास्राद्यृत्सावनायुघदिकादिकमार्क्षमानात् ८ गर्गः पौर्णमास्यवसानःस्यान्मासोदेवऋतुस्तथा दर्शांतोमानुषोल्येतौविंध्याद्युत्तरदक्षिणौ ९ आर्ष्टिषेणिः दर्शांतोवैदिकोमासोराकांतःस्मार्त्तउच्यते पौराणोहरिधस्त्रांतःसौनउत्पत्तिपूर्वकः १० संक्रांतिद्वयसयुक्तःक्षयमासःस्मृतोबुधैः संक्रांतिरहितोमासोयोधिमासःसउच्यते ११ यस्मिन्वर्षेऽधिमासः स्यादाषाढस्तुनदात्रहि कोकिलाख्याभवेन्मासोत्यनिपुण्यफलप्रदः १२ स्कंदे शुचिमासाधिकोयस्मिन्वर्षेचैवप्रजायते तस्मिन्नेवव्रतकार्यनान्यवर्षेकदाचन १३ संक्रांतिरहितसूर्यशुचिमासंपरित्यजेत् ससंक्रांतिशुक्लोमासि पौर्णिमारभ्यनारद १४ यावच्छ्रावणमासस्यपौर्णिमाख्यातिथिर्भवेत् तावत्कालव्रतकार्ययोषिद्भिःपतिदेवनं १५ भविष्योत्तरे वर्षयस्मिन्दैवयोगाद्भाद्रिनद्वितयभवेत् तदाशोकव्रतकार्यंमासमेकंसुखासये १६ वर्षेचयस्मिन्नहो देवीभवेतामधिमासको ससपारव्यःप्रथमजोमलसंज्ञस्तथोत्तरः १७

संचांद्रतुपितृकर्मणि यज्ञेसावनमित्याहुरार्क्षेस

र्वव्रतेषुच कल्पलतायां चांद्रेविवाहयज्ञादिगर्भकृत्यादिसावने नाक्षत्रेधनगर्भादिसौरेखेचरकर्मचेत्यादिविकल्पव्यवस्यादेशसंज्ञेदनविज्ञेया ८ विंध्यात् विंध्याचलपर्वतान् ९ राकांतःपूर्णिमांतः हरिधस्त्रांतःसूतिकायांभवःसौतः १० क्षयमासादिमासज्ञानमाह संक्रांतीति ११ कोकिलमासस्यज्ञा

नमाहस्पष्टं १२ शुचिराषाढः १३ पौर्णिपूर्णिमां १४ १५ संसर्पमासज्ञानमाहस्पष्टोर्थः १६ १७ १८ १९ स्तोकायुषामल्पायुषां २० २१ चातु
र्मास्यव्रतग्रहणविसर्जनकालमाह चातुर्मास्यव्रतानामितिपरिकल्पनंनिश्चयं २२ उपक्रममारंभः २३ २४ २५ चार्कप्रवेशदिनतःधनसंक्रांतिप्रवे-

सम्यक्सर्पतिसर्वेषुपुण्यकर्मक्षयःसदा अतःसंसर्पसंज्ञोयंमासःपुण्यैरवाप्यते १८ आश्विनेमासिसंसर्पयुतेष
ष्ठिदिनात्मके कार्यव्रतोत्तममिदंशोकदारिद्र्यनाशनम् १९ स्तोकायुषांनृणामेतदाश्विनंहितयत्फलं सुदुर्लभमिति-
ज्ञात्वाश्रद्धयाव्रतमाचरेत् २० अशोकस्यव्रतकार्यंद्वात्रिंशद्दिवसेषुच पूर्वाश्विनेशुक्लपक्षेकादश्यामारभेद्व्रतं २१ अथा
श्विनेपूर्णिमायांकुर्याद्व्रतसमापनं चातुर्मास्यव्रतानांचकुर्वीतपरिकल्पन २२ व्रतप्रारंभकालास्तुप्रोक्ताःपूर्वंविष्णु ना
उपक्रमंचतुर्मासव्रतानांचनरःशुचौ २३ एकादशीद्वादशीचपौर्णिमासीतथाष्टमी कर्कटाचैवसंक्रांतिस्तेषुकुर्याद्व्रतारंभ
विधिं २४ कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेत् चत्वारोवार्षिकामासादेवस्योत्थापनावधि २५ सौरमानेनचार्कप्र-
वेशदिनतःसुधीः यावन्मकरपर्यंतधनुर्मासव्रतंचरेत् २६ अर्कशुक्रकुजेपातेवैधृतौद्वादशीदिने धनुर्मासार्चनान्मृ-
णाकोटिकोटिगुणोत्तर २७ एवमष्टादशानांचमासानांनिर्णयोमया सक्षेपेणप्रकथितोत्राध्यायादिकंब्रुवे २८
अथचैत्रस्यमाहात्म्यंत्रिंशदध्यायसंमितं भविष्योत्तरकेप्रोक्तमानंदलेशसयुत २९ ततोवैशाखमाहात्म्यस्कांदोक्तंब
हुविस्तरम् पंचविंशाध्याययुक्तंपाद्मलेशसमन्वित ३० अथाग्र्यज्येष्ठमाहात्म्यंत्रिंशदध्यायसंमितम् भविष्योत्त
रकप्रोक्तमदेवात्रप्रकथ्यते ३१

शदिनमारभ्यमकरसंक्रमपर्यंतंसौरमासंधनुर्मासव्र
तमाचरेदिति २६ तत्रापिविशेषपर्वाण्याह पुण्यमितिशेषः २७ अध्यायादिकं अध्यायसंख्या आदिशब्देनपुराणप्रमाणमपि २८
आनंदलेशसंयुतं आनंदरामायणसारांशसहितम् २९ ३० ३१ ७ ८ ९

३२ ३३ ३४ ३५ ३६ स्कांदीयसारोद्धारोक्तं स्कंदपुराणांतर्गतसारोद्धारोक्तं पाद्मादिलेशसंयुतं पद्मपुराणब्रह्मपुराणाद्युक्तसारांशसहितं
३७ अपरंअध्यायाःसंति ३८ ३९ अथवायुप्रोक्तं ४० भविष्योक्तंनामपंचपर्वात्मकभविष्योपपुराणोक्तंनतुभविष्योत्तरमहापुराणप्रोक्तं ४३ द्वि

अतःपरंप्रवक्ष्यामित्याषाढस्यमहात्मकं एकोनत्रिंशदध्यायैःस्कांदोक्तंरुमनोहरं ३२ ततःश्रावणमाहात्म्यंत्रिंशद्
ध्यायसमितं अतिचित्रकथायुक्तस्कांदोक्तंरुमनोहर ३३ अथभाद्रपदस्यैवमाहात्म्यंचातिसुंदर भविष्योत्तरकंप्रोक्त
त्रिंशदध्यायसंयुतं ३४ स्कांदलेशेनसहिततोग्नेचाश्विनाख्यकं वक्ष्यामिमासमाहात्म्यंदेवीपूजनसंयुत ३५ प्रोक्तंभवि
ष्योत्तरेयत्रिंशदध्यायसंयुत अनेकलेशसहितंमनोहरकथायुत ३६ अतःपरंकार्तिकस्यमाहात्म्यंकथयाम्यहं स्कांदी
यसारोद्धारोक्तंपाद्मादिलेशसंयुत ३७ चतुर्विंशतिरध्यायास्तथासत्यपिचापरे मार्गशीर्षस्यमाहात्म्यंषोडशाध्या
यसंमितं ३८ प्रोक्तंस्कंदपुराणेयत्तदेवप्रोच्यतेत्रहि ततःपौषस्यमाहात्म्यंस्कांदोक्तंप्रवदाम्यहं ३९ युक्तंपंचदशाध्याये
स्यमाघमहात्म्यकं त्रिंशदध्यायसहितंवायुप्रोक्तंरुविस्तरं ४० तथाभविष्यपाद्मादिलेशेनचसमन्वितं अथफाल्गु
नमाहात्म्यंभविष्योक्तंमहाद्भुतं ४१ कथितंतत्रचाध्यायाःप्रोक्ताश्चद्विहिसंमिताः ततोहास्यरसैर्युक्तंमाहात्म्यफा-
ल्गुनोद्भवं ४२ अध्यायपंचकेनैवमन्मथोक्तंभविष्यति ततोग्रेधिकमाहात्म्यंप्रोच्यतेबहुविस्तरं ४३ एकत्रिंशैस्तथा-
ध्यायैःपुराणसारसंयुतं ततोग्नेचभविष्योक्तंधनुर्मासमहात्म्यकं ४४ चतुरध्यायसंयुक्तमपरंचापितत्रहि पंचाध्या
यसमायुक्तंपंचरात्रागमोदितं ४५ एवंनवाध्याययुक्तमेकत्रिंशैस्ततःपरं कोकिलमासमाहात्म्यंस्कांदोक्तंप्रवदाम्यहं ४६

द्वीसंमिताः एकोनचत्वारिंशत्संख्याकाः द्विद्वीशब्देनएकोनचत्वारिंशत्संख्यास्वरशास्त्रेप्रसिद्धा ४२ मन्मथोक्तंमन्मथसंहितोक्तंअधिकमाहात्म्यपुरु
षोत्तममासमाहात्म्यं ४३ पुराणसारसंयुतं पुराणसारसमुच्चयोक्तंभविष्यपद्मकालिकास्कंदनारदादिपुराणोक्तसारांशसहितमित्यर्थः ४४ ४५ ४६

०	नामानि	नामानि	सूर्याः	देव्यः	देवताः
१	चैत्रमासः	मधुः	वेदांगः	रमा·	विष्णुः
२	वैशाखः	माधवः	भानुः	मोहिनी·	मधुसूदन·
३	ज्येष्ठः	शुक्रः	इंद्रः	पद्माक्षी·	त्रिविक्रम·
४	आषाढः	शुचिः	रविः	कमला·	वामन·
५	श्रावणः	नभाः	गभस्तिः	कांतिमती·	श्रीधरः
६	भाद्रपदः	नभस्यः	यमः	अपराजिता·	हृषीकेशः
७	आश्विनः	रूक्मरेताः	पर्जन्यवल्लिः	इषा	पद्मनाभः
८	कार्तिकः	ऊर्जः	दिवाकरः	राधा·	दामोदरः
९	मार्गशीर्षः	सहः	मित्रः	विशालाक्षी	केशवः
१०	पौषः	सहस्यः	विष्णुः	लक्ष्मी·	नारायणः
११	माघः	तपः	अरुणः	रुक्मिणी·	माधवः
१२	फाल्गुनः	तपस्यः	सूर्यः	धात्री·	गोविंदः

नथैवविंशोरध्यायेस्संसर्पाख्यमहात्मकं भविष्योत्तरकेप्रोक्तं दिह्याद्यप्रकथ्यते ४६ तन्नाग्नेचचतुर्मासमाहात्म्यंवदाम्यहम् मार्कंडेयतथास्कांदेवाराहेचपुराणके ४७ यदुक्तंतस्यसारांशं सारोद्धारारब्धसज्ञकम् पंचाशतैस्तथाध्यायैः कथानकसमन्वितम् ४८ एवमुक्तोमयासम्यक्माहात्म्याध्यायसंक्रमः॥ज्योतिषार्णवमध्यस्थेधर्मस्कंधेमहाद्भुते ४९ अरुणोमाघमासेतु सूर्योवैफाल्गुनेतथा चैत्रमासेतुवैदांगोभानुर्वैशाखएवच ५० ज्येष्ठमासेतपेंद्रुःआषाढेतपनोरविः गभस्तिःश्रावणेमासेयमोभाद्रपदेतथा ५१ रूक्मरेताश्चाश्वयुजिकार्तिकेचदिवाकरः मार्गशीर्षेनपेन्मित्रःपौषेविष्णुःसनातनः ५२ इत्येतेद्वादशादित्यामासनामान्यनुक्रमात् केशवंमार्गशीर्षेतुपोषेनारायणंविदुः ५३ माधवंमाघमासेतुगोविंदमथफाल्गुने चैत्रेविष्णुंतथाविद्याद्वैशाखंमधुसूदनं ५४ त्रिविक्रमंतथाज्येष्ठंआषाढेवामनंविदुः श्रावणेश्रीधरंविद्याद्धृषीकेशंतुभाद्रके ५५ आश्विनेपद्मनाभंचऊर्जेदामोदरंविदुः मार्गशीर्षेविशालाक्षीपौषेलक्ष्मीश्चदेवता ५६ माघेतुरुक्मिणीप्रोक्ताधात्रीवैफाल्गुनेस्मृता चैत्रेमासेरमादेवीवैशाखेमोहिनीतथा ५७

५० ५१ ५२ ५३ ५४ ५५ ५६ ७ ७

५७ ५८ ५९ ६० ६१ ६२ इतिहरिकृष्णविनिर्मितायांदंशोद्धारटीकायांप्रथमोध्यायः १ इहखलुभगवान्ज्ञानानंदाद्यनंतगुणपरिपूर्णः परमकारुणिकः श्रीवेदव्यासः सकलपुरुषार्थसाधनप्रकाशकस्यानंतवेदमहार्णवस्यतत्त्वज्ञानार्थमष्टादशपुराण्यष्टादशोपपुराणादीनिचकारतथाचोक्तव्याचकेचित्तशुद्ध्यैशतपथब्रह्मदयंयः पुराणेतिहासैरित्यादि तेषुचकलिरूपाजगरगिलितानांअतएवस्वधर्मत्यागिनांमंदानांयोग्यप्राणिनांसंसृतिदुःखनिवारणार्थंव्रतस्नानदानजपादिनापापक्षयपूर्वकचित्तशुद्धिद्वारास्वस्वरूपानंदाविर्भावलक्षणमोक्षसुखप्राप्तयेचैत्राद्यष्टादशमासमाहात्म्यानिचकार तत्रादौ निखिलनिगमार्थं सारभूतं चैत्रमाहात्म्यप्रतिपादकं प्रकरणं रामकथामृतमयंसरइवपृथिव्यांप्रतिष्ठापयामासग्रंथादौमंगलमाचरणीयमित्यन्यान्पौराणिका

पद्माक्षीज्येष्ठमासेतुआषाढेकमलेतिच् कांतिमतीश्रावणेचभाद्रमास्यपराजिता ५८ पद्मावत्यश्विनेदेवीराधादेवीतुकार्तिके ५९ स्वनामतस्तुमासस्याद्विवर्णस्तूद्विद्वोरिति नाम्यूर्द्ध्वः श्वेतकृष्णः पिंगलोचनमूर्द्धजः ६० सूर्यचंद्रान्वितःसोयप्रतिमासंतुपूज्यते स्वनामपूर्वकैर्मंत्रैर्नामपूजावसानकैः ६१ मासमाहात्म्यमिद्धान स्तबकेचतुर्थके उपोद्घातप्रसंगारव्योत्थ-ध्यायःप्रथमोऽभवत् ६२ इतिश्रीगुर्जरव्यंकटरामात्मजहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवे अष्टमेधर्मस्कंधेमासमाहात्म्यस्तबकउपोद्घाताध्यायः १ ॥ अथचैत्रमासमाहात्म्यप्रारंभः॥ ॥ ॥नारायणनमस्कृत्यनरंचैवनरोत्तमम् देवींसरस्वतींचैवततोजयमुदीरयेत् १

नुपशिक्षयन्स्वयमाचरतिनारायणमिति अत्रनारायणपदेनांतर्यामिजलशायिश्रीकृष्णाग्रहणात् तदुक्तंनारोजीवसमूहः स्यादयनंतस्यतेनमित्यंतर्यामिनोग्रहणंतथा आपोनाराइतिप्रोक्ता आपोवैनरसूनवः अयनंतस्यताः पूर्वंतेननारायणस्मृतइति जलशायिनोग्रहण इतरयोरुक्तप्रसिद्धं यथाश्रीभागवतेतादृमौवैभगवतोहरेरंशाविहागतौभारव्यपायचभुवः कृष्णौयदुकुरूद्वहौ तंत्रैच अर्जुनेनुनरावेशःकृष्णोनारायणः स्वयमितिनरपदेनहिरण्यगर्भव्यष्टिजीवमुन्यर्ज्जुनानांग्रहणंनरोऽजेमनुजेऽर्जुनेइतिमेदिनीकोशः नरोत्तमनृत्तमयतिश्रवणादिनाश्रे

श्रेष्ठत्वंगमयतीति नरोत्तमोव्यासः तत्संप्रदायप्रवर्तकत्वात्तंचनमस्कृत्यदेवींसरस्वतींतदुपदेशाद्व्यासरस्वतींवाचंदेवींद्योतनात्मिकांचनमस्कृत्यव्यासमिति पाठेनरोत्तममितिप्रत्येकसंबंधनीयंजयत्यनेनाविद्यातत्कार्यंससाक्षेतिजयोग्रंथस्तमुदीरयेदितिशिक्षाजयशब्दस्यार्थोभविष्योत्तरे विष्णुधर्मादिशास्त्राणिशिवधर्माश्चभारत कार्ष्णंचपंचमोवेदोयन्नायाभारतंस्मृतं सीतारामादिधर्माश्चमानवोक्तामहीपते जयेतिनामचैतेषांप्रवदंतिमनीषिणः इति १ हेमुनीश्वर हेरोमहर्षणएतन्माहात्म्यवक्तासूतःरोमहर्षणःयतोभविष्योत्तरपुराणवक्तारोमहर्षणः तथाचोक्तंपाद्मे ब्राह्मंपाद्मंवैष्णवंचक्रमेमात्स्यंचवामनं वाराहब्रह्मवैवर्तनारदीयंभविष्यक आग्नेयमष्टमंवैसूताच्छुश्रुवुर्लोमहर्षणात् एतानितुपुराणानिह्यापरांतेश्रुतेनहि शौनकाद्यैर्मु

ऋषयऊचुः कथितास्तुकथाब्रह्मन्नानाविस्मयकारकाः इदानींश्रोतुमिच्छामस्तत्वंवदमुनीश्वर २ मासाश्चद्वादशप्रोक्तास्तेषामध्येवरश्चकः यस्मिन्स्नानेनदानेनसर्वमासफलंलभेत् ३ सूतउवाच भोभोऋषिवराःसर्वेयूयंधन्यास्तपस्विनः भवद्भिःपरमःप्रश्नःकृतोलोकोपकारकः ४ सावधानेनमनसाशृणुध्वंप्रोच्यतेमया मासानांप्रथमोमासश्चैत्रमासस्तुकथ्यते ५ दानयज्ञव्रतसमःसर्वकामप्रदःस्मृतः यस्मिन्स्नानंचदानंचभवेत्कोटिगुणाधिकम् ६ तीर्थेषुप्रथमंयद्वत्कीर्त्यतेपुष्करंशुभम् नदीषुप्रथमायद्वत्स्वर्धुनीसप्रगीयते ७ भास्करःप्रथमोपद्मोच्यतेग्रहमंडले तिथीषुप्रथमायद्वद्बहुलाप्रतिपत्तिथिः ८

निवरैर्यज्ञारंभास्तुरैवहीति २ ३ ऋषिवराःऋषिश्रेष्ठाःपरमः श्रेष्ठः ४ मासानांद्वादशमासानांमध्येऽयंप्रथमःचैत्रमासः क्रियायायुक्ताचैत्रीपूर्णिमानयायुक्तश्चैत्रः सएवमासः चैत्रोमोहनिकः कामसरवश्च फाल्गुनानुजःचैत्रिकश्चेतिकोशः अद्यारंभत्वादयमेवप्रथमःकथ्यतइति ५ ६ स्वर्धुनीभागीरथी ७ बहुलाप्रतिपत्कृष्णपक्षस्याप्रतिपत् असितोबहुलःकृष्णः शुक्लेतरसितेतरइतिकोशः प्रतिपत्तिथ्याधिक्यसंमाननाच्चप्रायःदुत्तरदेशनिवासिनांमतेनेत्यवगंतव्यंतेषांतद्दिनएवमासारंभःसत्वात् ८

९ १० सरैरर्चितः पूजितः ११ १२ १३ रुद्रदांसंबंधिनां १४ लोहानांधातूनां १५ १६ मीनेमीनसंक्रांतौ-अरुणोदयलक्षणं पंचपंच

संवत्सरेषुसर्वेषुयद्दत्तुप्रभवःस्मृतः तद्वच्चैत्रश्चमासेषुसर्वेषुप्रथमःस्मृतः ९ मासानांप्रथमोमासश्चैत्रमासःप्र
कीर्त्यते मातृवत्सर्वजीवानांसद्यवैष्टफलप्रदः १० धर्मसारःक्रियासारस्तपःसारःसुरार्चितः सर्वदासर्वजीवा
नांमहापातकनाशनः ११ विद्यानांवेदविद्येवमंत्राणांप्रणवोयथा भूरुहाणांसुरतरुर्धेनूनांकामगोयथा १२
शेषोयथाचनागानांपक्षिणांगरुडोयथा देवानांचयथाविष्णुर्वर्णानांब्राह्मणोयथा १३ प्राणश्चप्रियवस्तूनां
भार्येवसुरुद्रदायथा पुष्पेषुचयथापद्मंसरसांमानसंयथा १४ आयुधानांयथावज्रंलोहानांकांचनंयथा वैष्ण
वानांयथारुद्रोरत्नानांकौस्तुभोयथा १५ मासानांधर्महेतूनांचैत्रमासस्तथास्मृतः नानेनसदृशोलोकेविष्णुप्री
तिविधायकः १६ चैत्रस्नानंचनिरतोमीनेभागरुणोदयात् लक्ष्मीसहायोभगवान्प्रीतिंतस्मिन्करोत्यलम् १७
जंतूनांप्रीणनंयद्वदन्नेनैवाहिजायते तद्वच्चैत्रेतुस्नानेनविष्णुःप्रीणात्यसंशयः १८ यश्चैत्रस्नाननिरतान्जनान्दृ
ष्ट्वानुमोदते तावन्नापिविमुक्तोघोविष्णुलोकेमहीयते १९ सकृत्स्नात्वामीनसंस्थेसूर्येमातःकृतान्हिकः महापा
पैर्विनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् २० एवं प्रभावःखलुभोमुनीश्वराःश्रीचैत्रमासश्चमयाप्रकीर्तितः स्नास्यं
तियेतत्रनरामहाधियस्तेस्वर्गलोकेबहुभोगभोगिनः २१ इतिश्रीभविष्योत्तरपुराणेश्रयोध्यारवंडेचैत्र
माहात्म्येचैत्रमासवर्णननामप्रथमोऽध्यायः १

उषःकालःषट्पंचैवारुणोदयः सप्तपंचभवेत्सातः शेषःसूर्योदयःस्मृतइति १७ प्रीणनंतर्पणंतृप्तिःप्रीणातिसंतुष्टोभवति १८ अनुमोदते अनु
मोदनंकरोति तावत्तानुमोदनमात्रेणतपः १९ २० २१ इतिश्रीकायांप्रथमोऽध्यायः १

१ २ ३ ४ ५ ६ ७ अशनात्तुल्याभोजनतुल्या ८ मासमितिशेषः ९ १० ११ अव्रतेनव्रताचरणंविनारुरुर्नामअतिक्रूरसत्वाप
देशः रुरोः इयंरौरवीतां १२ नद्यादाविति शेषः १३ कूटचित्तःकुटिलांतःकरणः केवलंसंकल्पमात्रकः स्नानंकरोमि दानंदास्यामीतिवाचकः न

ऋषयऊचुः भोभोसूतमुनिश्रेष्ठयत्त्वयाकथितःशुभः चैत्रमासप्रभावश्चश्रुतोस्माभिश्चसादरात् १ इदानींप्र-
ष्टुमिच्छामःपुनश्चैत्रस्यवर्णनम् विशेषात्सर्वपापानांनाशकारणमुत्तम २ तत्त्वदमहाभागकृपयास्माकमादरात्
नत्वहुणसमोवक्ताजगत्यांविद्यतेमुने ३ सूतउवाच शृण्वंतुमुनयःसर्वचैत्रमासस्यवर्णने भवद्भिश्चैवयत्पृ-
ष्टं प्रोच्यतेतन्मयाधुना ४ नचैत्रेणसमोमासोनकृतेनसमोयुगः नचवेदसमं शास्त्रंनतीर्थंपुष्करोपमं ५ न-
जलेनसमंदानंनस्करंभार्यायासमं नकृतेस्तुसमंवित्तंनलाभोजीवितात्परः ६ नतपोनशनात्तुल्यंनदानात्परमं-
स्करम् नधर्मस्तुदयातुल्योनज्योतिश्चक्षुषासमं ७ नतृप्तिरशनात्तुल्यानवाणिज्यंकृषेःसमम् नधर्मेणसमं-
वित्तंनसत्येनसमंयशः ८ नारोग्यसमंमृत्यानंनत्रातृकेशवात्परः नहित्वैत्रसमोलोकेपवित्रकवयोविदुः ९ सर्व
षांचैवमासानामुत्तमागमकीर्तितं यथोद्दिष्टाएतासर्वेषांशिरःश्रेष्ठप्रकीर्त्यते १० चैत्रमासेनरैःकार्यप्रातःस्नानंवि
धानतः नियमश्चविधातव्योयथाशक्त्याव्रतंचरेत् ११ अव्रतेनत्वयेद्यस्कंमधुमासमहाशुभम् रौरवीयातनाभु-
क्त्वातिर्यग्योनिंसगच्छति १२ स्नानार्थंचैत्रमासेयःपादमेकंचलेद्यदि सोश्वमेधशतानांचफलंप्राप्नोत्यसंशयः१३
अथवाकूटचित्तस्तुकुर्यात्संकल्पमात्रकम् सोपिक्रतुशतपुण्यलभत्येवनसंशयः १४ योगच्छेद्धनुरायाम-
स्नातुंमनिगतेरवौ सर्वबंधविनिर्मुक्तोविष्णुलोकंसगच्छति १५

तुदातास्नानंच सोपिक्रतुशतंपुण्यंलभतेइत्यर्थः १४ धनुरायामंधनुर्निक्षेपपरिमितदूरंजलाश्रयंप्रति १५ ५ ६

स्वग्रामनिकटे तीर्थनद्याद्यभावेपि स्वल्पजलाशयेवात्येवस्नानार्थंगच्छेदित्याह त्रैलोक्येति १६ १७ १८ १९ २० २१ २२ इतिटी-

त्रैलोक्येयानितीर्थानि ब्रह्मांडांतर्गतानिच तानिसर्वाणिचैत्रेस्मिन्संतिवाप्यजलेल्पके १६ तावच्छिरवंतिपापा निगर्ज्जंतियमशासने यावन्नकुरुतेजंतुश्चैत्रेस्नानंजलाशये १७ तीर्थादिदेवताःसर्वाश्चैत्रेमासिमुनीश्वराः ब हिर्जलसमाश्रित्यसदासन्निहिताःशुभाः १८ सूर्योदयसमारभ्ययावत्षड्घटिकावधि निष्ठतिचान्नयाविष्णो र्नराणांहितकाम्यया १९ नत्राप्यकुर्वतास्नानंशापदत्वाप्रदारुणं स्वस्थानयातिशीघ्रंहितस्मात्स्नानंसमाचरेत् २० नस्मादयंचैत्रमासःशेषशायिप्रियःसदा अत्रतेननयेद्यस्तुचाडालूश्वसजायते २१ एवमहत्सौख्यविवृद्धि कारीश्रीचैत्रमासेत्रमयास्मृतोहि स्नानेनयस्मिन्सकलाघनाशःप्रकीर्तितःश्रेष्ठमुनीश्वरैर्हि २२ इतिश्रीभ विष्योत्तरपुराणे अयोध्याखंडेचैत्रमाहात्म्येचैत्रस्नानकालवर्णननामद्वितीयोऽध्यायः २ ऋषयऊचुः किंदानंकिंफलंतत्रकमुद्दिश्यचरेद्व्रतम् कस्मिंस्तीर्थेचकर्तव्यंचैत्रस्नानंमहाफलम् १ कृतंकेनपुरासूतचैत्रस्ना नंमहाफलं कोविधिश्चकदारंभःसर्वंविस्तरतोवद २ सूतउवाच सौराष्ट्रविषयेकश्चिद्राजापरमधार्मिकः पुण्यकीर्तिरितिख्यातःसर्वशस्त्रास्त्रधृग्जयी ३ चंद्राननेतिनामासीद्दयितास्यभूभृतः पतिव्रत्येनधर्मेण तोषयंतीपतिंसदा ४ अनपत्यःसराजाथबहुचिंतापरायणः भार्यासहितोराजारंतुंबलसमन्वितः ५ ययौवनेमहारम्येनानाद्रुमविराजिते नानापक्षिशताकीर्णेबहुश्वापदसेविते ६

कायांद्वितीयोऽध्यायः २ ७ कंदेवं १ २ सौराष्ट्रविषये सौराष्ट्रदेशेपश्चिमसमुद्रतीरे द्वारकानिकटे ३ ४ रंतुंरमणंकर्तुं क्रीडाकर्तुंबलसमन्वितः ५ श्वापदाः गजसिंहमृगव्याघ्रादयः ६ ७ ७ ७ ७

रसाल आम्रवृक्षः अर्जुनः अर्जुनसादडा इतिप्रसिद्धः वृक्षभेदः दर्भभेदः तृणविशेषश्च भूनिंबः किराइतः जंबुः प्रसिद्धः पुक्षः पिंपरीवृक्षः आम्लवेतसोनिंबुभेदः ७
शालः सागवृक्षः क्षुद्रफणसवृक्षः चारोलीवृक्षो वा तालः ताडवृक्षः हिंतालः कंटकनाडवृक्षः नलदः जटामांसीशेषस्पष्टं ८ शाल्मली सांवरीवृक्षः ९ १०

सभार्यः शिबिकारूढः पश्यन्वनमनुत्तमं रसालार्जुनभूनिंबजंबुपूक्षाम्लवेतसैः ७ शालैस्तालैस्तमालैश्चहिंतालैःसवेतोद्भवं नलदैर्वेणुगुल्मैश्च केतकीभिर्विराजितं ८ शाल्मलीतिंदिणीबीजपूरदाडिमसंवृतं पनसैःकदलीभिश्चनानावल्लिविराजितं ९ करवीरैस्तमालैश्चखर्जूरीवृक्षमंडितं जातिपत्रीलवंगादिनानातरुविराजितं १० सारिकाबककारंडकेकिंककाशताकुलं कपोतपिकनादैश्चसर्वतोपिविराजितं ११ नदीशतसमाक्रांतंनानागिरिविराजितं तटाकैर्विविधैश्चित्रनानाद्विजनिषेवितं १२ कौतुकान्दर्शयन्पत्न्यैपुण्यकीर्तिर्नृपोत्तमः शनैःशनैःसविध्याद्रेःशिखरंप्रतिचायययौ १३ दृष्वातत्रसरश्रेष्ठंरम्यंपरमसुंदरं समुद्भूतनिमंदिव्यहेमपंकेरुहान्वितम् १४ नानावृक्षशताकीर्णंबहुपक्षिविनादितं तत्रराजापुण्यकीर्तिर्विंध्याद्रेःशिखरेशुभे १५ स्फटिकैश्चित्रितेदेशेस्ववासमकरोत्ततः सैन्येनभार्ययायुक्तःस्त्रीसहस्रसमाकुलः १६ कियत्कालनृपस्तत्रतस्थौक्रीडन्सभार्यया एतस्मिन्नंतरेतत्रमाध्यान्हेतत्सरोवरे १७ ययौमार्गेणमांडव्यःसहस्रंमुनिसंयुतः पुण्यकीर्तिश्चतंदृष्वाप्रत्युज्जायमुनीश्वरं १८ ऋषिभिःसहितं नत्वासंस्तानन्यवेशयत् पादावनेजनंतेषांराजाकृत्वासभार्यया १९ चंदनैःशीतलैर्लेपत्रकेतंगामुनोरमं चूतजंबुकपित्थादिनानाफलपुरःसरम् २० उपचारैःषोडशभिःपूजयामासतान्मुनीन् वीजयन्व्यजनेनापिसुप्तविष्टान्मुनीश्वरान् २१ पप्रच्छराजाविनयात्प्रवृद्धकरसंपुटः कुतश्चागमनंजातंगम्यतेकुतःपरम् २२

कामयूरध्वनिःपिकः कोकिलः ११ १२ १३ हेमपंकेरुहान्वितंऋवर्णकमलैर्युतं १४ १५ १६ १७ १८ १९ २० २१ २२ केकीमयूरस्तस्य के

श्रुत्वामुनीनांचकदंबकेनयद्भाषितंगोप्रतिपालकेन प्रोवाचमांडव्यमुनिम्प्रहर्षात्पृथ्वीपतिंबाक्यमतिप्रशस्तं २३ इतिश्रीभविष्योत्तरपुराणेन्मयोध्याखंडेचैत्रमाहात्म्येराजमांडव्यसमागमोनामतृतीयोऽध्यायः३ मांडव्यउवाच शृणुराजन्प्रवक्ष्यामियत्पृष्टभवतानघ ब्रह्मादेर्दर्शनंकृत्वाचागताःस्मस्तवांतिकं १ इदानीगम्यतेराजन्चैत्रस्नानार्थमादरात् विचित्रेसरयूतीरेम्येषाऽयोध्यापुरीमति २ इतिमांडव्यमुनिनायत्प्रोक्तंवचनंशुभं पुण्यकीर्तिश्चतच्छ्रुत्वापुनःपप्रच्छमादरं ३ पुण्यकीर्तिरुवाच भोमांडव्यमुनिश्रेष्ठयत्प्रोक्तंप्रभुणात्वया मधुमासेवगाहार्थमयोध्यागम्यतेमया ४ अत्रजानोस्निसंदेहोमुनेत्वंतेनिवारय कथंसर्वेषुमासेषुचैत्रमासस्तयास्मृतः ५ कथंस्नानंचैत्रमासेकर्तव्यंचेतिमांवद इतिश्रुत्वानृपेणोक्तंमांडव्यःपुनरब्रवीत् ६ सम्यगुक्तंत्वयाराजन्शृणुष्वावहितोभव चैत्रमाससमोमासोनभूतोनभविष्यति ७ यथाविष्णुसमोदेवोनभूतोनभविष्यति। यथामूलंहिवृक्षस्यप्रधानसर्वदोच्यते ८ तथामासेषुसर्वेषुमधुमासःप्रकथ्यते यत्कृतंमधुमासेवैयदास्यान्मीनगोरविः ९ सर्वंतदक्षयंविद्यान्नात्रकार्याविचारणा स्नानंदानंजपोहोमःश्राद्धंचपितृतर्पणं १० देवपूजादिकंसर्वंभवेत्कोटिगुणंमधौ नस्मात्सर्वप्रयत्नेनस्नातव्यमधुमासके ११ यथायज्ञःसर्वगुणोपपन्ननशोभतेहीनपरिच्छदंनृप तथान्यमासेषुकृतोहिधर्मश्चैत्रेणहीनश्चरथैवयाति १२ यथैवकन्यासकलैरुलक्षणैर्युक्तापिजीवत्पतिलक्षणोज्झिता तथान्यमासेषुकृतोहिधर्मश्चैत्रेणहीनश्चरथैवयाति १३ शाकंतुयद्दलवर्णेनहीननशोभतेसर्वगुणोपपन्नं तथान्यमासेषुकृतोहिधर्मश्चैत्रेणहीनश्चरथैवयाति १४

यथासकलैर्लक्षणैर्युक्ताकन्याजीवत्पतिलक्षणोज्झिता

ताजीवत्पतिलक्षणेनकुंकुमकज्जलादिसौभाग्यलक्षणेनउज्झिताव्यक्तानशोभतेतथा १३ १४ ५ ५

ललनास्त्री यथाललामैर्भालस्थकुंकुमतिलकैः कुरुकमैः पुष्पैश्चयथानशोभते एवंचैत्रेणचैत्रमासधर्मेणविनान्यमासकृतधर्मोपि १५ १६ कृष्ण भक्तेनाप्येतद्व्रतमवश्यंकर्तव्यमित्याह ननंदसूनोरिति १७ १८ १९ कास्यभोजीकास्यपात्रेभोजनकर्ता अच्युतसत्कथः अच्युता अच्युता अच्यु

यथाललामैः कुरुकमैर्नभासतेवस्त्रेणहीनाललनाचराजन् तथान्यमासेषुकृतोहिधर्मश्चैत्रेणहीनश्चवृथैवयाति १५ तस्मात्सर्वप्रयत्नेनयेनकेनापिदेहिना चैत्रमासस्ययोधर्मः कर्त्तव्यइतिनिश्चयः १६ ननंदसूनोःपृथगस्तिरामो नरामतोन्योवसुदेवसूनुः अतस्त्वयोध्यापुरपालकस्यचैत्रेतुकार्योविधिवत्प्रपूजने १७ जानकीकान्तमुद्दिश्यमीनसंस्थे दिवाकरे प्रातःस्नात्वाजपेद्रामममन्यथानरकंव्रजेत् १८ चैत्रमासोहिसकलोसीतारामयदैवतः यद्यत्कर्महितत्सर्वंतमुद्दिश्यचरेन्नरः १९ चैत्रेयःकास्यभोजीहितथाचाच्युतसत्कथः अस्नाताश्चाप्यदाताचनरकानेवविंदति २० तैलाभ्यंगंदिवा स्नापंतथावैकास्यभोजनं खट्वानिद्रांगृहस्नाननिषिद्धस्यचभक्षणं २१ चैत्रेतुवर्जयेद्दृष्टोहिभुक्तंनिशिभोजनं चैत्र-मासेतुमध्यान्हेस्नातानाचाद्विजन्मनां २२ पादावनेजनंकुर्यात्तद्व्रतंतुव्रतोत्तमम् मस्तकेधारयेच्चापस्तत्सादस्पर्शसंभवाः २३ एवंहिसर्वेषुचचैत्रमासोमासेषुपुण्योपचयंप्रदाता प्रोक्तंमयाभोनृपपुण्यकीर्ते मुक्तिंचमुक्तिंचददातिसर्वान् २४ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येचैत्रश्रेष्ठत्ववर्णननामचतुर्थोऽध्यायः ४ ॥ पुण्यकीर्तिरुवाच किमर्थंमधुमासोहिसर्वमासेषुचाधिकः तन्मांडव्यसमाख्याहिकृपाकृत्वामयोपरि १ मांड व्यउवाच शृणुराजन्पुण्यकीर्तेचैत्राधिक्यस्यकारणं यत्पृष्टवत्यापुण्यंमहापातकनाशनम् २ नासत्कयाईश्वर

संबंधिनीकथायेनस्नातोनर्हिर्जलस्नाता २० निषिद्धस्यमासकुलित्थमसूराद्यधान्यस्यमूलकाद्यंबीरादिफलशाकाद्यामिषस्य २१ अष्टौवर्जयेदिति पूर्वेणसंबंधः २२ तत्सादस्पर्शसंभवाच्चापः तत्सादप्रक्षालनजलंमस्तकेधारयेत् २३ २४ इतिटीकायां४ अधिकः अधिकपुण्यप्रदाता १ २

३ ४ अमरत्ववरंवव्रेनदाब्रह्मान्अमरत्वंनप्राप्तवान्च ५ सर्वैर्जनैःसर्वजंतुभिः मरुद्गणैःदेवैः ६ इंद्रंयदस्याभिलाषेतपसितप्तेदेवप्रेषितयावाणीरूपयासरस्वत्याविमोहितंबहुनिद्रापदंयाच्यमानंकुंभकर्णप्राह ७ ८ रजोगुणयुक्तोरावणः कुंभकर्णस्तामसः विभीषणस्तु केवलसात्विकः अत

पुराराक्षसवंशेतुसमुत्पन्नामहाबलाः रावणःकुंभकर्णश्चविभीषणइतित्रयः ३ तैस्तुसंचतपःश्रेष्ठंतोषितश्चतुराननः ददौतेषावरान्ब्रह्मातान्शृणुष्वनृपोत्तम ४ रावणश्चवररम्यंवव्रेब्रह्माणमुत्तमम् अमरत्वनसमादात्ततोब्रह्माब्रुवीहचः ५ यज्जातनश्यनिक्षिप्रंतत्सर्वकालपर्ययात् अतोमनुष्यहीनैस्त्वंजनैःसर्वैमरुद्गणैः ६ अवध्योभववीर्येणमहतख्यातिंगमिष्यति कुंभकर्णंततःप्राहसरस्वत्याविमोहितः ७ बहुनिद्रायाच्यमानंषण्मासंनिद्रितोभवषण्मासंसभवोयोहिआहारस्तवभोसुर ८ निद्रांतेदिवसंचैकंभविष्यतिनसंशयः ततोविभीषणंप्राहसात्विकंचतुराननः ९ हरिभक्तिंपाच्यमानंसत्यधर्मपरायणं नारायणःसदातस्तुहृदयेभोविभीषण १० इत्युक्त्वाप्रययौब्रह्मासत्यलोकंसनातनं रावणःकुंभकर्णश्चगर्वितौतद्वरादुभौ ११ त्रैलोक्यंपीडयंतौतौयज्ञविघ्नविधायिनौ चक्रतुःसागरेवासंरम्येवैत्रिकुटाचले १२ लंकायांराक्षसेंद्राणांराजधान्यांबलैःसह देवान्स्ववशगान्कृत्वारावणश्चातिगर्वितः १३ निघ्नन्ऋषीन्जनान्सर्वान्पीडयन्जगतीतलं तद्बलेनहिपुष्टांगारादसास्तलवासिनः १४ पृथिवींप्रययुःसर्वेनानोपद्रवकारिणः तेषांभारेणखिन्नासाजगतीक्षीरनीरधिं १५ प्रययौशरणंविष्णुंदिव्यस्त्रीरूपधारिणी प्रार्थयामासतंकृष्णंततःप्रोवाचतांहरिः १६ किंकार्यंवद्भोदेविकिमर्थमिहचागता साप्रोवाचमहाविष्णुंभूभारंनसहाम्यहं १७ मज्जामिजलमध्येहिप्राणांस्त्यक्ष्यामिनिश्चितं इतिनस्यावचःश्रुत्वाज्ञात्वाब्रह्मोदितंवरं १८

एवसात्विकंनं ९ सागरेत्रिकुटाचलेसमुद्रमध्यस्थत्रिकुटाचले १२ १३ तलवासिनःपातालवासिनः १४ तेषांदुष्टदैत्यानां १५ १६ १७ १८

जगतीश्रीहरिःप्राह मादेहंत्यजकंदरी अवतारंग्रहिष्यामिनरजन्मनित्वत्कृते १९ भूभारंसंहरिष्यामिसंवधिष्यामिरावणं यथास्थानंसुरवरगच्छमारवेदभज़भामिनी २० इतिसावचनंश्रुत्वावासुदेवस्यपावनी पृथ्वीयथौनिजं स्थानंकिंचिद्धर्षसमन्विता २१ श्रीकृष्णोपिक्षणध्यात्वादेवान्सस्मारचेतसि ततोब्रह्मादिकाःसर्वेयुयुक्तत्रक्षणेनहि २२ नत्वानारायणदेवंप्रबद्धकरसंपुटाः स्थिताश्चेदंणसहितास्तुतिंकृत्वापुनःपुनः २३ तान्प्रोवाचहरिःसाक्षादवतारंनृजन्मनि अधुनाहंग्रहीष्यामिभूभारहरणायवै २४ सर्वैमरुद्भिःकपिरूपधृग्भिःयुद्धेजगत्योममत्सहाय्यम् रुद्रादिभिर्वैकरणीयमत्रतरावणंभ्रातृबलंहनिष्ये २५ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येहरिपृथ्वीसवादोनामपंचमोऽध्यायः ५ मांडव्यउवाच इतिब्रह्मादिकानुक्त्वावासुदेवस्तदान्प अयोध्यापालकस्याथराज्ञोदशरथस्यहि १ कौसल्यायास्तुभार्यायाजठराग्निर्गतोबहिः चैत्रेमासिसितेपक्षेनवम्यांपरमेदिने २ मध्यान्हेप्रकटोजातःश्रीरामोराजसद्मनि आनंदश्चतदाजातःसर्वत्रजगतीतले ३ देवदुंदुभयोनेदुःपुष्पवृष्टिःशुभापतत् राजसद्मनिवात्यानासघानेदुःपृथक्पृथक् ४ ननृतुश्चाप्सरारम्याजगुर्गीतमनोरमम् तदासर्वेहिभूमिस्थाजनाद्रष्टुंशिशुंशुभं ५ प्रययुर्नृपजंबालदक्षामुदमवाप्नुयुः नानाविमानमारूढादिविदेवाःसवासवाः ६ मिलितासाघवद्दृष्टकौसल्याजठरोद्भवम् ब्रह्मारुद्रश्चसूर्यश्चदेवेंद्रादिसुराःशुभाः ७ उत्सवान्विदधुःसर्वेतदाश्रीरामजन्मनि एवमुत्साहसमयेदेवाहर्षान्विताःस्थिताः ८

१ २ ३ संघाःसमूहाः ४ ५ अवाप्नुयुः ६ ७ ८ ९ ५ ५

नमस्कृत्यरामचंद्रंतुष्टुवुर्विविधैःस्तवैः प्रोचुस्तदास्कराःसर्वेहर्षादेवंरघूत्तमं ९ अद्यधन्यावयंदेवमुक्ताश्चासुरजाद्भयात् यन्निमित्तत्वयादेवत्यवतारःकृतोभुवि १० अस्माकहर्षकालोयंदेवदेवकृपानिधे तस्मादयंसदापुण्यःश्रेष्ठःकालोभविष्यति ११ त्वंचाप्यंगीकुरुष्वाद्यदत्यस्मैसुबहून्वरान् इतितेषांवचःश्रुत्वादेवानारायणःप्रभ १२ तुतोषनितरांतेषुदेवेषुभगवान्हरिः सम्यक्प्रोक्तसुराःसर्वेयत्नैलोक्योपकारक १३ भवद्भिःप्रार्थितोहृतुहर्षकालेमहत्तमे शृणुध्वंवचनमद्ययद्धर्षात्प्रोच्यतेमया १४ सर्वेषामेवमासानांश्रेष्ठश्चायंभविष्यति वैशाखात्कार्तिकःश्रेष्ठःकार्तिकान्माघएवच १५ माघमासाद्वरश्चायंचैत्रमासोभविष्यति चैत्रमासेकृतंदत्तंहुतंस्नानंविचिंतितं १६ सर्वकोटिगुणंप्रोक्तमयोध्यायांविशेषतः यच्छ्रेयश्चाश्वमेधेनगोमेधेनचयत्फलं १७ यत्फलंसोमयागेननच्चैत्रस्नानमात्रतः सूर्यग्रहेकुरुक्षेत्रेयच्छ्रेयःस्नानदानतः १८ तच्छ्रेयःस्यान्नरोस्नानादयोध्यायांसुरोत्तमाः अत्रवैशरयूतीरेरावणलोकरावणं १९ हत्वानत्वापशात्यर्थंकरिष्यामिकृतंशुभं यत्रयागसमारंभोहिभविष्यतिसुरोत्तमाः २० तत्तीर्थंममनाम्नाहिख्यातिंश्रेष्ठागमिष्यति अयोध्यायारामतीर्थेसरयूजलमध्यगे २१ चैत्रस्नानप्रकुर्वाणास्तेनरामोक्षभागिनः यथामाघःप्रयागेहिस्नातव्यःसुखमिच्छता २२ कार्तिकोपियथाकाश्यांपंचगंगाजलेस्मृतः द्वारकायांयथामोक्षोवैशाखोमाधवप्रियः २३ अयोध्यायारामतीर्थेतथाचैत्रोभविष्यति २४ चैत्रमासेतुसंग्रामेसर्वेदेवाःसवासवाः बर्हिर्जलंसमाश्रित्यनिधंहिममाज्ञया २५ एवहरिस्तान्मधवादिकान्सकरानुक्तास्करैस्तैश्चनमस्कृतोबभौ वृषद्रमारुत्यशिवोनिजस्थलंययौसकरास्तेपिययुर्निजस्थलं २६

२४ सवासवाः सेंद्राः २५ २६ ७ ७ ७ ७

इतिटीकायांषष्ठः ६ १ २ ३ ४ ५ ६ ७ ८ व्रतस्यप्रारंभकरणेविसर्जनेचकालप्रमाणेप्रकारत्रयमाह फाल्गुनस्येत्यादिना ९ १० ११ १२
व्रतग्रहणसंकल्पसमयेदेशकालावुच्चार्यनियमप्रार्थनामंत्रावाहह्याभ्यांसीताकांतेत्यादिना १३ १४ १५ इष्टदेवतास्मृत्वाप्रानःस्मरणंकृत्वा १६

इतिश्रीभविष्योत्तरपुराणेश्रयोध्यारवंडेचैत्रंचैत्रमासवरप्रदानंनामषष्ठोऽध्यायः ६ मांडव्यउवाच तस्मात्सर्वेषु मासेषुमुख्यश्चैत्रःप्रकीर्त्यते मासादौःप्रथमःसर्वैःप्रोच्यतेहिवृराड्वरः १ चैत्रेमासिप्रकर्त्तव्यंतस्मात्स्नाननरोत्तमैः अरुणोद यवेलाया यावत्सूर्यस्यदर्शनं २ तावत्स्नानप्रशंसंतिमुनयस्तत्त्ववेदिनः निर्णयंतत्रराजेंद्रप्रवदामिचतच्छृणु ३ षण्णाड्यधिक पंचाशद्यदासूर्योदयाद्भवेत् अरुणोदयकालोसौनूनोनाड्यत्रयावधि ४ सूर्योदयस्तनश्चोर्ध्वं घटिकामात्रएवहि प्रोक्तोमुनिवरैः श्रेष्ठैःसर्वशास्त्रार्थपारगैः ५ यदालकापुरीमध्येभवेत्सूर्यस्यदर्शनं कालोवारप्रवृत्त्याख्योमुनिभिःपरिकीर्तितः ६ एवप्रोक्तोम हाराजचैत्रमासःशुभावहः विस्तरेणमयावक्तुंशक्यतेनविमुक्तिदः ७ पुण्यकीर्तिरुवाच महाफलत्वयाप्रोक्तंचैत्रेस्नानान्मुनी श्वर तस्यस्नानविधिंसम्यङ्मियमानंपिमेवद ८ मांडव्यउवाच फाल्गुनस्यचमासस्ययाशुक्लादशमीतिथिः तस्याकुर्याच्च संकल्पयावत्सादशमीमधोः ९ तावत्स्नानविधातव्यमितिकेषामनस्मृतं फाल्गुन्याः पूर्णिमायाश्चयावच्चैत्रीतुपूर्णिमा १० चैत्रस्ना नंहितावच्चकर्त्तव्यंनात्रसंशयः यावन्मीनगतोभानुर्मेषराशिंगमिष्यति ११ स्नातव्यंचमधौतावद्दिनिसर्वत्रनिर्णयः संकल्पःप्रथ मंकार्योव्रतेनापावनेदिने १२ सीताकांतमहाविष्णोदीनाथप्रतिपालक त्वत्प्रीत्यर्थंकरिष्यामिचैत्रस्नानंमहाशुभं १३ यानिका निचपापानिनानाजन्मकृतानिच तानित्वंनाशयक्षिप्रंचैत्रस्नानेनमेहरे १४ इतिसंकल्प्यपश्चात्तुप्रकुर्यान्नियमान्शुभान् रात्र्यां तुर्यांशेषायामुत्थिष्ठेच्चसदाव्रती १५ प्रक्षाल्यपाणिपादौचनत्वाचम्यभक्तितः सुखासीनस्तनःस्मृत्वास्वकीयामिष्टदेवतां १६ प्रागुदीचीव्रजेद्ग्रामाद्धिःसोदकभाजनः जलंवाहृत्तीर्थाद्वादेवतायतनादपि १७

सोदकभाजनःजलपूरितपात्रसहितः तीर्थस्यज

लेनमूत्रपुरीषोत्सर्गशुद्धिकरणनिषेधात्साकृतजलाभावेतीर्थस्थजलेनैवसर्वव्यवहारेपात्रेतीर्थस्थंजलंगृहीत्वाभुखेनोच्छिष्टकृत्वा शेषेण मूत्रपुरीषोत्सर्गंकृत्वा

करणेनदोषइत्यर्थः मलोत्सर्गकरणेदेशास्थलनियममाहजलप्रवाहादित्यादिना १७ चनुःशतहस्तमितंस्थाननल्पसंज्ञकं किष्कुर्हस्त वितस्तोचनल्वः किष्कुचतुः शतमित्युभयत्राप्यमरः अतएवपुरीषोत्सर्गेनल्वस्यार्द्धनामद्विशतहस्तपरिमितांभूमिंत्यजेन् मूत्रेशतहस्तपरिमितांस्थीवननाशिकामलत्यागेपंचाशद्धस्तप्रमितांउच्छिष्टलेपत्यागेपंचविंशतिहस्तपरिमितांभूमिंत्यजेदिति १८ १९ २० पूर्वोक्तस्थलनिर्णयस्यापवादमाहव्याघ्रेत्यादिना २१ मूत्रोत्सर्गविधिमाह ब्रह्म

नल्वस्यार्द्धंननोप्यर्द्धंतस्याप्यर्द्धंननोर्द्धकं त्यजेत्पुरीषमूत्रेचक्रमान्निष्ठीवनादिके १८ उच्छिष्टलेपसंत्यागेरथ्यायांवृक्षसन्निधौ मलंनैवोत्सृजेन्मूत्रकृष्णाभूमौबिलेथवा १९ वासयोग्यगृहेवापिगोष्ठेवाचत्वरेपिवा स्मशानेयज्ञभूमौवामलमूत्रंनोत्सृजेत् २० व्याघ्रदस्युभयेऽरण्येवृक्षगुल्मेभयंकरे शक्तोपिचप्रवाहादिसमीपेमलमुत्सृजेत् २१ आतुरोजेरठश्चैवद्विनतदोषभाग्भवेत् पात्रंचदक्षिणेकृत्वाब्रह्मसूत्रंचपृष्ठतः २२ अथवाकर्णसंस्थंचकृत्वाचैवयुदङ्मुखः तृणैःशुष्कैश्चयेभूमिमाच्छाद्यमलमुत्सृजेत् २३ विदार्येन्मलनत्तुकम्यनुत्सृत्तिहेतवे मौनीचाधोमुखीभूत्वाशिरःप्रावृत्यवाससा २४ वक्त्रंनियम्यवस्त्रेणष्ठीवनःश्वासवर्जितः गृहीतशिश्नश्चोत्थायगृहीतशुचिमृत्तिकः २५ हस्तत्रयस्थितपश्चादादायाभःकमंडलुं लोष्ठशौचविधायादौजलशौचंसमाचरेत् २६ एवमलोत्सर्गविधिःसमस्तोयथाक्रमंभोजगतीराराजन् प्रोक्तोमयातेयशुभेशृणुष्वशौचक्रमंवैसकलंवदिष्ये २७ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येमलोत्सर्गविधिर्नामसप्तमोऽध्यायः ७ ७

भाडव्यउवाच ततोमृदमादायशुद्धभूमिसमुद्भवां गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः १ सकृल्लिंगेप्रदद्यात्तामर्द्धमृल्लकमात्रतः पंचकृत्वस्तथापानेलिंगवासाङ्चधावयेत् २ ततःस्थानांतरंगत्वा वामेदद्यान्मृदोदश उभयोःसप्तकृत्वस्तुपंचपंचपादयोः ३

सूत्रंयज्ञोपवीतं २२ २३ २४ २५ २६ इतिटीकायांसप्तमोऽध्यायः ७ अतंद्रितः अनालस्यः

१ तांमृत्तिकांन्यपानेगुदे पंचकृत्वः पंचवारंलिंगे २ प्रथमतःवामेवामहस्तेदशवारंमृत्तिकांदद्यात् पुनःउभयोर्हस्तयोःसप्तवारं पादयोःपंचपंचवारं ३

मूत्रोत्सर्गे मेहनेलिंगे सकृदेकवारं वामेवामहस्तेत्रिः पुनर्द्वयोर्हस्तयोर्द्विवारंपादयोरपिद्विवारंमृत्तिकास्मृता ४ महारात्र्यामर्द्धरात्र्यां मूत्रपुरीषोत्सर्गेपूर्वोक्त
नियमस्यार्द्धंविधिंकुर्यात् पथिमार्गेप्रवासे ५ एतदाश्रमपरत्वेनमृत्तिकादिग्रहणविधानऽत्तरोत्तरविशेषदेहांतः करणयोः शुद्धिप्रदर्शनार्थमित्यर्थः ६
किंचव्रतदानजपानुष्ठानादिसत्कर्मकरणे पूर्वोक्तमेतच्छौचंकार्यं अन्यथागंधलेपक्षयपर्यंतंशौचमितितात्पर्यं उक्तंचकाष्ठभारशतेनापिमृद्भारैश्चनगोप

मैथुनेप्येवमेवस्यान्मूत्रेस्यान्मेहनेसकृत् त्रिर्वामेद्विर्द्वयोर्द्विर्द्विःपादयोर्मृत्तिकाःस्मृताः ४ महारात्र्यामेतदर्द्धेतदर्द्धेपथिच
स्मृतं आतुरेनियमोनास्तिमहापातकयोरपि ५ एतच्छौचंगृहस्थस्यद्विगुणंब्रह्मचारिणः वानप्रस्थस्यत्रिगुणंयतीनांचचतुर्गुणं
६ तत्कर्मानुष्ठिनेशौचमेवंकार्यंप्रयत्नतः गंधलेपक्षयकरमन्यथापरिकीर्तितं ७ एवंस्त्रीणांचशूद्राणामनुलोमविलोमिनां
व्रतादौद्विगुणंकार्यंसर्वैःपुण्याभिवृद्धये ८ शौचहीनेनयत्कर्मशुभमेवासुभंकृतं तच्चकर्मभवेत्पापंतस्माच्छौचंसमाचरेत्
९ शौचकर्मविहीनस्यसमस्तानिष्फलाःक्रियाः दंतशुद्धिंततःकुर्याच्छुद्धकाष्ठेनयत्नतः १० मुखशुद्धिविहीनस्यनमंत्राःफ
लदायकाः दंतजिह्वाविशुद्धिंचततःकुर्यात्प्रयत्नतः ११ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहि
वनस्पते १२ इतिमंत्रंसमुच्चार्यद्वादशांगुलमात्रकं कनिष्ठाग्रसमंस्थूलंवर्तुलंत्यव्रणंकरुं १३ कार्पासींनुबरींवेणुंतिंतिणीं
चविवर्जयेत् कषायकटुतिक्तेनाग्निनाग्निद्याच्चतुर्दशी १४ प्रतिपद्दर्शनवमीषष्ठीश्चार्कदिनेष्वपि चंद्रसूर्योपरागेचनकुर्य्या
द्दंतधावनं १५ उपोषणाहेश्राद्धाहेन्यमायारविसंक्रमे वर्जयित्वादंतकाष्ठमुखशुद्धिंव्रतीचरेत् १६ निर्द्दिष्टेदिवसेकुर्यादंडूषान्
द्वादशैवतु तृणपर्णैःसदाकुर्यादमामेकादशींविना १७

मैः आमृत्योराचरच्छौचंभावहीनोनशुद्ध्यतीतिभावोत्रचात्याभ्यंतरशुद्धिकार
णंनान्यदिति ७ अनुलोमविलोमिनांसूतांबष्ठादिद्वादशमिश्रजातीनां ८ शौचस्यावश्यकतामाहत्रिभिः ९ १० ११ १२ दंतकाष्ठमितिशेषः १३ दंतका
ष्ठेवर्ज्यवृक्षानाह कार्पासीमिति निंद्यान् अर्कैरंडकंठकादियुक्तान् काष्ठेनदंतधावनेवर्ज्यतिथिनाह १४ काष्ठेनेतिशेषः १५ मृत्तिकादिनेतिशेषः १६ १७

भूनिंबःकिरातिक्तः निर्गुंडीप्रसिद्धा ब्रह्मवृक्षःपलाशः रक्तागस्त्यवृक्षश्चविडंगोविडिंगःप्रसिद्धः आदिशब्देनजयपालाद्यत्युष्णवृक्षान् १८ १९ २० आकूर्परोकरावितिहस्तप्रक्षालनेहस्तस्यमध्यभागपर्यंतंहस्तप्रक्षालनंकुर्यादित्यर्थः २१ २२ २३ आलयेदेवतालये २४ २५ अन्यान्गायकानपि

कंटकीवृक्षभूनिंबनिर्गुंडीब्रह्मवृक्षकाः वटैरंडविडंगाद्यान्वर्जयेद्दंतधावने १८ समिधःक्षीरवृक्षस्थतथान्यतरुसंभवाः
ग्रहणीयाःप्रयत्नेनकार्यदंतविशोधनं १९ आत्मनःशुद्धिकामार्थंदंतानांचविशुद्धये दंतशुद्धिंकरिष्यामिप्रसन्नोभवराघव २०
एवंदंतान्विशोध्याथजलैःप्रक्षालनंचरेत् सकर्णंतुमुखंप्रोक्षकरावाकूर्परौस्मृतौ २१ आजानुक्षालयेत्पादौगुदंसांडुतुधावयेत्
आचम्यचततोगच्छेत्स्वगृहंप्रतिसत्रती २२ गंधान्पुष्पाणितांबूलंगृहीत्वाभक्तितत्परः प्रबोधार्थंहिरामस्यगृहंगच्छेत्सदाव्रती
२३ ततोरामस्यविष्णोर्वात्यभावेशंकरस्यच तदभावेचसर्वेषामालयेपूजयेत्सुरान् २४ तत्रदेवस्यपाद्यादीनुपचारान्प्रकल्पयेत् पूज्यस्तुत्वापुनर्नत्वाकुर्याद्गीतादिमंगलान् २५ पुष्पैर्गंधैःसतांबूलैर्गायकानपिवाचयेत् देवालयेगानपरायतस्तीविष्णुमूर्तयः २६ तपांसियज्ञादानानिकृतादिषुजगद्गुरोः तुष्टिदानिकलौतस्माद्भक्त्यागानंप्रशस्यते २७ एवंमयातेनृपतेसविस्तरंसादंतशुद्धिश्चनिवेदितागुभा प्रोक्तंप्रबोधार्थमपिप्रपूजनंगानप्रभावंशृणुचाद्यवक्ष्ये २८ इतिश्रीभविष्योत्तरपुराणेत्रयोध्याखंडेचैत्रमाहात्म्येदंतशुद्धिविधाननामाष्टमोऽध्यायः ८ ७ मांडव्यऽवाच कथंवदसिदेवेशमयापृष्टस्तुपार्थिव विष्णोरेवंतदाप्राहमद्भक्तिपरितोषितः १ नाहंवसामिवैकुंठेयोगीनांहृदयेरवौ मद्भक्तायत्रगायंतेतत्रनिष्ठामिभोमुने २
तेषांपूजादिकंगंधंपुष्पादिक्रियतेनरैः तेनप्रीतिंपरांप्राप्यनत्यामत्प्रपूजनात् ३ मत्पुराणकथांश्रुत्वामद्भक्तानांचगायनम् निंदंतियेनरामूढातेमह्येभवंतिहि ४

वाचयेत् यूयमपिगानंकुरुतेतिवदेदित्यर्थः २६ जगद्गुरोःविष्णोःतुष्टिदानिसंतोषकराणि कलौतु नामकीर्तनमेवयस्मात्कलौतद्धरिकीर्तनमितिवचनात् तस्मात्कलौभक्त्यागानंप्रशस्यते २७ इतिटीकायांअष्टमः ८ ७ १ २ तेषांमद्भक्तानां ३ ४

५ शिरीषः शिरसइतिप्रसिद्धः उन्मत्तो धत्तूरः गिरिजामोगरीपुष्पं शाल्मलीभवंसावरीवृक्षोत्पन्नंपुष्पं कर्णिकालघुश्वेतनुईकंटकशेवतीवाऽक्षतैर्यैर्वैःतदुक्तंव्रता
र्कैरक्षतास्तुयवाप्रोक्ताइति ६ जपाजात्रकंदः कुंदाबृहत्श्वेतजाई ७ मुनिपुष्पैःअगस्तिपुष्पैः ८ ९ १० ११ १२ मानुषेमनुष्यरुतेतडागादिकेदेवखाते

एवंविष्णुश्चमांप्राहतस्माद्दानंप्रकारयेत् तालवेणुमृदंगादिध्वनियुक्तंसनर्तकं ५ शिरीषोन्मत्तगिरिजामास्थिकाशाल्मलीभ-
वैः अर्कजैःकर्णिकारैश्चविष्णुर्नार्च्यस्तथाक्षतैः ६ जपाकुंदशिरीषैश्चकथिकामालतीभवैः केतकीभवपुष्पैश्चनैवार्च्यःशंक
रस्तथा ७ गणेशंतुलसीपत्रैर्दुर्गांबिल्वैतुदुर्वया मुनिपुष्पैस्तथासूर्यंलक्ष्मीकामोनचार्चयेत् ८ येभ्योन्यानिप्रसूनानि पूजाया-
मुत्तमानिच ग्रहणीयानिनितिभिर्यथाऋतुभवानिहि ९ एवपूजाविधिंकृत्वादेवदेवंक्षमापयेत् मंत्रहीनंक्रियाहीनंभक्तिहीनं-
सुरेश्वर १० यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ततःप्रदक्षिणांकृत्वादंडवत्प्रणिपत्यच ११ पुनःसमाप्यदेवेशगायनाद्यसमाप
येत् नाडिद्वयावशिष्टायांरात्र्यांगच्छेज्जलाशयं १२ तिलदर्भाक्षतापुष्पगंधाद्यैःसहितः शुचिः मानुषेदेवखातेचनद्यामथच
संगमे १३ क्रमाद्दशगुणंस्नानंतीर्थेतद्विगुणंस्मृतं पृथिव्यांसर्वदेशेषुनानाक्षेत्राणिभोनृप १४ रामतीर्थाभिषक्तेतेश्रीराघवकृ-
तानिहि यत्रयत्रवरतीर्थंरामतीर्थंमहच्छुभं १५ तत्रतत्रमधुस्नानंकर्तव्यंसर्वदानरैः अन्यतीर्थेमधुस्नानाद्यत्फलप्राप्यतेनरैः
१६ तत्फलकोटिगुणितंरामतीर्थेमधौस्मृतं विष्णुंस्मृत्वाततःकुर्यात्संकल्पंसवनस्यच १७ तीर्थादिदेवताभ्यश्चक्रमादर्घ्यादि
दापयेत् नमःकमलनाभायनमस्तेजलशायिने १८ नमस्तेस्तुहृषीकेशगृहाणार्घ्यंनमोस्तुते जानकीकांतहेरामत्वंत्रैमीनगते
रवौ १९ प्रातःस्नानंकरिष्यामिनिर्विघ्नंकुरुराघव त्वंत्रैद्यमीनगेभानौप्रातःस्नानपरायणः २० अर्घ्यंतेहंप्रदास्यामिगृहाणरघुना
यक गंगाद्याःसरितःसर्वास्तीर्थानिजलदानदाः २१

अकृत्रिमेजलाशयेके १३ तीर्थेमहातीर्थेशंखोद्धारपुष्करमणिकर्णिकाइंद्रद्युम्नपुष्करिण्यादि
के १४ मधुमासेत्वयोध्यानिकटस्थसरयूरामतीर्थयोरलाभेयत्रकुत्रापिक्षेत्रस्थरामतीर्थेएवस्नानंकुर्यात्नपृथिव्यांरामतीर्थेविनाक्षेत्रंमस्तीतिभावः १५ १६ सवं-
त्सरस्नानस्य १७ १८ १९ २० २१

२२ २३ २४ २५ २६ २७ अन्यतीर्थेरामतीर्थावाहनकर्तव्यतामाह तीर्थमध्येमलस्नानमादौकृत्वापश्चादंजलिपुटमध्येजलंगृहीत्वाअयोध्येसरयू-
श्रेष्ठेरामतीर्थमहत्तम स्नानकालेसन्निधिंमेदर्शयस्वरघूत्तमेतिमंत्रंपठित्वा तज्जलंजलमध्येनिक्षिप्यस्नात्वाजलतर्पणंअर्घ्यादिकंचदद्यात् २८ सितंश्वेतं २९

प्रनिगृत्यमयादत्तमर्घ्यंसम्यक्प्रसीदत्व ब्रह्माद्यादेवताःसर्वाऋषयोपेत्रवेष्णवाः २२ तेगृण्हंतुमयादत्तमर्घ्यंसम्यक्प्रसीद
श्व ऋषभःपापिनांशास्तात्वयमःसमदर्शन २३ गृहाणार्घ्यमयादत्तंयथोक्तफलदोभव अयोध्येसरयूश्रेष्ठेरामतीर्थमह-
त्तम २४ गृण्हत्वर्घ्यमयादत्तंयूयंसम्यक्प्रसीदश्व इतिचार्घ्यंसमर्प्यथपश्चात्स्नानंसमाचरेत् २५ अन्यतीर्थेषुसर्वत्रस्मृत्वानो
सरयूंनदीं अयोध्यारामतीर्थंचचैत्रस्नानंचरेत्तनः २६ रामतीर्थंनवेयत्रयत्रायोध्यापुरीनच यत्रसासरयूर्नास्तितत्रस्मृत्वावगाहु
येत् २७ तीर्थंकृत्वाराममूर्तेस्तीर्थमध्येतुतत्क्षिपेत् स्मृत्वात्रयंपूर्वमुक्तपश्चात्स्नानंसमाचरेत् २८ एवंहितीर्थंमधुमज्जनेवं
कृत्वासमस्तजलतर्पणंतु वस्त्रंसितंतत्परिधायशुद्धंरम्यासनेचापविशेद्धृतस्थः २९ इतिश्रीभविष्योत्तरपुराणेअयोध्या
खंडेचैत्रमाहात्म्येस्नानविधिर्नामनवमोऽध्यायः ९ ७ माडव्यउवाच तिलकान्द्वादशतानोगोपीचंदनसंभवान् स्वदे-
हेधारयेद्विप्रस्तेकथ्यंतेमयाधुना १ करेवामेमृदंघ्र्यंजलेनद्वारकोद्भवां तिलकंधारयिष्यामिचेतिसंकल्पयेत्ततः २ गायत्र्या
वायमूलेनमंत्रयित्वाप्रयत्नतः मृत्तिकेधारयिष्यामिभक्त्यात्वांकेशवप्रिये ३ त्वयासृष्टोगमिष्यामिविष्णुलोकंसनातनं
गायत्र्यामूलमंत्राभ्यांदशकृत्वश्चिरेवा ४ मंत्रयित्वाततोभक्त्यातिलकान्धारयेत्सुधीः द्विषट्चतुर्द्व्येकसंख्यान्विभा
ग्राविभृयुःक्रमात् ५ ललाटमध्योदरदृद्वलेषुपार्श्वेभुजेकर्णमूलेचदक्षे तद्वद्वामेपृष्ठमध्येचमूर्द्धिशक्लेन्यसेत्केशवादी
नितेषु ६ इतिटीकायांनवमः ९ ७ १ २ ३ मूलमंत्राभ्यांॐनमोभगवतेवासुदेवायॐनमोविष्णवेइतिद्वाभ्यां ४ द्विषड्द्वादश-
स्थानेषुब्राह्मणः चतुस्थलेचनुष्येक्षत्रियः द्विस्थलेवैश्यः ललाटरेथेकस्थलेशूद्रः एतेक्रमात्बिभृयुः ५ ६ ७ ८

तत्रद्वादशस्थानान्याह ललाटेकेशवं उरसेनारायणं हृदयेमाधवंदक्षिणकुक्षौगोविंदं दक्षभुजेविष्णुंदक्षकर्णमूलेमधुसूदनं वामकुक्षौत्रिविक्रमं वामभुजेवामनं
वामकर्णमूलेश्रीधरंपृष्ठेऋषीकेशं कंठमध्येपद्मनाभं मूर्ध्निदामोदरन्यसेत् गोपीचंदनधारयेत्न्यथशुक्लपक्षक्रमः ६ कृष्णपक्षेसंकर्षणं वासुदेवंप्रद्युम्नं

संकर्षणादीन्यथकृष्णपक्षेनामानिविष्णोर्ब्राह्मणोद्वादशैव ललाटेहृद्बाहुषुक्षत्रजातोवैश्योललाटेहृदयेशूद्रः ७ ललाटएवैकमथान्यनामान्युक्तक्रमेणैवसदैवविन्यसेत् एवंतुवैष्णवैःकार्यतिलकानांचधारणम् ८ शैवादीनांविधिंराजन्शृणुष्वत्रमयोच्यते हेमजोभूतिमादायसद्योजातादिमंत्रकैः९ मानस्तोकेतिमंत्रेणतत्तद्वर्णोक्तसंख्यकान् तर्जन्यनामिकामध्यांगुलिभिस्तिलकान्धरेत् १० एवंविधायपुंड्राणिपश्चात्संध्यासमाचरेत् श्राद्धंसंध्याजपोहोमःस्वाध्यायःपितृतर्पणं ११ व्यर्थंभवतितत्सर्वंविनापुंड्रेस्तुयत्कृतं स्त्रियोवापुरुषोवापिविनापुंड्रंकदाचन १२ नकुर्यात्सकृतंकर्मक्रियमाणंवृथाभवेत् सुवासिन्यांपिबिभृयुस्तिलकोपरिकुंकुम १३ पश्चात्कुर्यात्शुभंकर्मगृहकार्याणियानिच अनामिकाशांतिकरीमध्यमायुःकरीभवेत् १४ अंगुष्ठःपुष्टिदःप्रोक्तःतर्जनीमोक्षदायिनी तत्तदंगुलिनाकुर्यात्तत्तत्कामोर्ध्वपुंड्रकं १५ व्रतीसंध्यांतुसंपाद्यप्रातःकालसमीरितां अग्निहोत्रोदितंहोमं हुत्वावैभार्ययासह १६ प्रातःकालोदितंकर्मसमाप्यार्चोहरेःपुनः केशवोमार्गशीर्षेहिपरमंदैवतंस्मृतं १७ नारायणःपौषमासेमाघेश्रीमाधवःस्मृतः गोविंदःफाल्गुनेप्रोक्तश्चैत्रेविष्णुश्चदैवतं १८ वैशाखेमधुहाप्रोक्तोज्येष्ठमासेत्रिविक्रमः आषाढेवामनःप्रोक्तः श्रावणेश्रीधरःस्मृतः १९ हृषीकेशोभाद्रपदेपद्मनाभस्तथाश्विने दामोदरःकार्तिकेस्याद्देवतापापनाशिनी २० तस्माच्चैत्रेमहाविष्णोःपूजनंतुप्रकारयेत् सविष्णुश्चैत्रमासेचैत्यवतारश्चकारह २१

निरुद्धं पुरुषोत्तमं अधोक्षजंनारसिंहं अच्युतंजनार्दनं उपेंद्रंहरिं

कृष्णं एवंद्वादशनामभिः गोपीचंदनंधारयेत् अयंब्राह्मणविषयः क्षत्रियेणललाटेहृदयेबाहुद्वये वैश्येनललाटेहृदयेइति ७ ८ ९ १० ११
१२ १३ पुंड्रकरणेअंगुलीनियममाह १४ तत्तत्कामःउर्ध्वपुंड्रकमितिछेदःसंधिरार्षः १५ १६ १७ १८ १९ २० २१

अवतारंचकारेति पूर्वेणान्वयः तस्यश्रेष्ठत्वमाह अवतारात्यनेकाश्चतेषुमुख्यादशस्मृताः दशावतारमध्येपिरामकृष्णोमहत्तमौ तयोरपिवरः पूर्वःसत्यसंधोरघूत्तमः एकपत्नीव्रतोवीरस्त्येकबाणोनृपोत्तमः समहीपपतिःश्रीमान्छत्रचामररंजितः एवंज्ञात्वोपासनात्रप्राह्यश्रीरामवस्त्वचेति २२ २३ २४ २५ २६ सीतारामंप्रपूजयेदित्यत्रविशेषमाह आनंदरामायणेनवायतनपूजासाश्रेष्ठात्रेयाशुभप्रदा यापंचायतनीपूजात्रेयासामध्यमात्रहि भिन्नदेवत्यातुपापूजाकनिष्ठासानिगद्यते अतिकनिष्ठापूजासाद्विदेवत्यास्मृताऽत्रहि सीतानुजौविनापूजारामस्यैकस्यनाचरेत् कृताचेद्विघ्नकर्त्रीस्यादिति

कौसल्याजठरद्रामनाम्नाभूभारशांतये तस्मात्तद्रूपधृग्विष्णोःपूजनंचात्रकीर्तितं २२ द्विभुजंसीतयायुक्तंचापबाणधृतायुधं दिव्यालंकारसंयुक्तंपीतकौशेपवाससं २३ सलक्ष्मणंसशत्रुघ्नंभरतेनसमन्वितं हनुमत्सेवितपदंसिंहासनविराजित २४ सितच्छत्रसमायुक्तंदिव्यचामरवीजितं वीभीषणसमायुक्तंकंबुग्रीवपरिवंदितं २५ जांबुवतावंदितंचत्यंगदेनपरिष्टुतं अयोध्यावासिनंरामंप्रवध्यायेत्सदाव्रती २६ उपचारैःषोडशभिःसीतारामंप्रपूजयेत् आवाहनंत्वासनंचपाद्यमर्घ्यंतथैवच २७ तनस्त्वाचमनंप्रोक्तंस्नानंवस्त्रंतथास्मृतं ब्रह्मसूत्रमलंकारंदशमंगंधलेपनं २८ पुष्पंधूपंतथादीपंनैवेद्यंचतथास्मृतः तांबूलंदक्षिणाचेतित्युपचाराश्चषोडश २९ एवमयातेतिलकमधारणंतथाहिमासोद्भवंदैवतानि प्रोक्तानिराजन्नृपपुण्यकीर्ते पूजाविधानंशृणुचाथवक्ष्ये ३० इतिश्रीभविष्योत्तरपुराणेअयोध्यामंडेचैत्रमा० तिलकधारणादिवर्णनंनामदशमोऽध्यायः १०

नवायतनदेवताकाइत्यपेक्षायांसीतादिगदांनाः पूर्वोक्ताः अथतेषांस्थानज्ञानाभावेकथंपूजनीयात्रतस्तेषांस्थानानिकृत्यानिचाह मुक्ताछत्रधरंलक्ष्मणंरामस्यपृष्ठभागेस्थापयेत्पूजयेच्च एवंचिंतयेत्यजनधरंशत्रुघ्नंरामवामपार्श्वेऽक्षमंडितचामरधरंभरतंरामदक्षिणपार्श्वेरामपादुकाद्वयधरंहनुमंतंरामपुरतःदर्पणधरंविभीषणंरामस्यैशान्येजलपात्रधरंकंबुग्रीवंरामस्यवायुभागेवस्त्रकौशेयधरं जांबुवंतं रामस्यनैर्ऋत्यभागेतांबूलपात्रधरंअंगदं रामस्याग्नेयभागेएवंसंस्थाप्यपूजयेदित्यर्थः २७ २८ २९ ३० इतिटीकायांदशमोऽध्यायः १० ७ ८ ९

पद्मानिलेखयेदित्यत्र कानिपद्मानितत्रमध्यपद्मसहितानिरामभद्राण्याह आनंदरामायणेशृणुशिष्यप्रवक्ष्यामिभद्राणांस्वनाःशुभाः अत्रोपास्याराममुद्रारुद्रश्चोपासकःस्मृतः रामनाम्नाभद्रमुक्तंरामचंद्रप्रपूजने पंक्तयोर्कमितास्तत्रसर्वाद्वादशपादजाः तासुपूर्वादिगारभ्यक्रमणैवमपूरयेत् प्रथमासप्तमीचोमपंक्तीकृष्णेनपूरयेत् ऊर्ध्वाधःपंचपंचैवपंक्तय स्तत्क्रमंब्रुवे तदधश्चद्वितीयायाःप्रथमंचद्वितीयकं चतुर्थसप्तमंषष्ठंत्यष्टमंनवमंतथा तथैकादशमंचापिकृष्णवर्णानिपूरयेत् तदधश्चतृतीयायाश्चतुर्थंषष्ठसप्तमौ तथैकादशमंचापिकृष्णवर्णानिपूरयेत् चतुर्थास्तदधश्चापिप्रथमंचद्वितीयकं चतुर्थसप्तमंषष्ठंनवमंरुद्रसंमितं तदधःपंचमायाश्चप्रथमंचद्वितीयकं चतुर्थंचतथाषष्ठंनवमैकादशेनथा राजेतिद्वेक्षरेशुक्लेद्रष्टव्येपंचपंक्तिषु पंचपंक्तिष्वधश्चाथप्रथमायाश्चपूर्ववत् तदधश्चद्वितीयायाःप्रथमंचद्वितीयकं चतुर्थंसप्तमंषष्ठंनवमंदशमंतथा तथाचैवद्वादशमंकृष्णवर्णानिपूरयेत् तृतीयायाश्चतुर्थंचषष्ठमर्कंचसप्तमे चतुर्थ्याः प्रथमंषष्ठद्वितीयंचचतुर्थकं अष्टमंनवमंचार्कंदशमंचापिपूरयेत् पंचमायाद्वितीयंचप्रथमंचचतुर्थकं षष्ठमर्कमष्टमंचसप्तमंदशमंतथा नवमंकृष्णवर्णानिरामेतिद्वे

मांडव्यउवाच तीर्थेदेवालयेवापिगोष्ठेपुण्यस्थलेषुच लिखाभूमिंगोमयेननतःपद्मानिलेखयेत् १

वलोकयेत् राजारामेतिचत्वारित्यक्षराणिनिरीक्षयेत् व्यत्ययाद्रामराजेतिबुद्ध्याकार्येऽक्षरेनरैः अथवारामनामेतितृतीयंनामकारयेत् विशेषंतत्रवक्ष्यामित्यधःपंचकपंक्तिषु पंक्तेश्चतुर्थंःप्रथमंपदंकृष्णंनकारयेत् नाकारस्तेनद्रष्टव्योरामनामावलोकयेत् अथवारामरामेतिविशेषश्चोर्ध्वपंक्तिषु प्रथमापूर्ववत् ज्ञेयाद्वितीयायास्ततःपरं प्रथमंचद्वितीयंचतृतीयंपंचमंतथा अष्टमंनवमंषष्ठंतथैकादशमंत्वपि तृतीयायाः प्रथमंचरुद्रंषष्ठंचपंचमं चतुर्थ्याः प्रथमंचैवद्वितीयंचतृतीयकं पंचमंसप्तमंचापित्यष्टमंनवमंतथा तथैकादशमंचापिकृष्णंवर्णानिपूरयेत् पंचमायाः प्रथमंचद्वितीयंचतृतीयकं पंचमंसप्तमंषष्ठंत्यष्टमं नवमंतथा तथैकादशमंचापिरमेतिद्वेक्षरेसिते नामान्येतानिचत्वारिचतुःपार्श्वेषुयोजयेत् लघुमुद्रान्वितंरामलिंगाख्यंभद्रमुच्यते मयाशिष्याधुनानंतुत्वंशृणु स्वस्थमानस निर्यगूर्ध्वमेकपंचाशद्रेखास्तत्सदेषुचसप्तसप्तपदांतेद्वौपरिधीपीतवर्णकौकार्यौतत्रकोणदेशेष्विंदुस्त्रिपदशक्लेकः शृंखल र्नुपदाकृष्णात्रयोदशपदालताहरिनेशोवसुपदः कृष्णवर्णःप्रकारयेत् त्रिपदंलोहितंत्तेयंभद्रस्तन्यस्तकस्थितंषड्दिपादात्मिकामुद्रातत्रेंद्रयमदिक्स्थितेत्युक्तापंक्तिकोणकोष्ठा-

न् सिंधुसिंधुमितान् तथासिंध्वर्नुपंक्तिद्वेसप्तमायाःपंक्तेःपदंत्वधः प्रणिधा पूरयेत्तत्र भानिरामेनिनमदंतत्रादावग्निमुद्रा स्तत्सीमापरिधयस्तथारक्तालिंगद्वयं भद्रंतथालिंगोपरिस्थितंपद्मद्वयंपीतवर्णवीथीवल्यानियोजयेत् द्वितीयेत्वेकमुद्राद्वोपरिधीद्वौशिवौमनोभद्रंनवपदंलिंगवल्योर्मध्येरसात्मकंभद्रंपीतलिंगो परिरक्तंतुर्यपदात्मकंलिंगस्कंधपदेद्वेद्वे हस्तेवीथीकापिचभद्राणिचीणिज्ञेयानिपीतद्वेलोहितेत्रिहतोंतः सर्वतोभद्रंकार्यंतत्रतुवापिकाचनुर्विंशपदाभद्रमंक कोष्ठलतैशिकात्रिपदोक्तः पंचपदाशृंखलापरिधिस्ततः मध्येपद्मंरक्तवर्णंरत्नपेद्मविचित्रितंपीतशुक्लरक्तकृष्णाचांतेपरिधयोमनाः एतत्षोडशमुद्राभिः

सितरक्तहरिपीतनीलकृष्णादिसंभवैः नानावर्णैश्चित्रितानितत्र पूजांसमारभेत् २ प्राङ्मुखःस्थरवमासीनोधृतपद्मासनोद्यती शंखोदकेनोपचारान्पूजायाःप्रोक्षयेत्ततः ३ शालिग्रामशिलासंस्थमथवाधातुसंभवं पाषाणनिर्मितंरामंध्यायेत् पूर्वोक्तमार्गतः ४ सीतारामसमागच्छमदग्रेत्वंस्थिरोभव गृह्णपूजांमदत्तांकृतमावाहनंतव ५ हिरण्मयंरत्नयुक्तंनानाचित्र विचित्रित सिंहासनंसवस्त्रंतेत्वासनार्थंददाम्यहं ६ चंदनागरुसयुक्तैर्जलैस्तीर्थसमुद्भवैः पाद्यगृहाणश्रीराममयादत्तंप्रसीदत्व ७ पुष्करादिषुतीर्थेषुगंगादिषुसरित्सुच यत्तोयंतन्मयानीतंदत्तमर्घ्यंगृहाणभो ८ सुगंधवासितंतोयंबहुतीर्थसमुद्भव आचमनार्थमानीतंगृहाणत्वंसुरेश्वर ९ हरिद्राकुंकुमैर्युक्तंसुगंधद्रव्यमिश्रितं सुगंधस्नेहसमिश्रमुद्वर्तनमथास्तुते १० कामधेनूद्भवंक्षीरंनदिव्यंअतिसुंदरं कपिलायाघृतंश्रेष्ठंमधुविध्यादिसंभवं ११ शीतोपलसमानाभसितायुक्तंमनोहरं पंचामृतंमयानीतंस्नानार्थंत्वं गृह्णाणभो १२

रामलिंगाख्यभद्रकं सदानंदमयंरामंविज्ञ्योतिषमनामयं सर्वावभासकंनित्यंस्वात्मानंसमुपास्महे तस्मिन्यस्सर्वतोभद्रंत्वदपंतत्मकीर्तितंतत्रपद्ममष्टपत्रंसकेशरंसकर्णिकं तत्स्थानरामलिंगस्यध्यानार्थंपरिकल्पितमिति एवंअष्टोत्तरसहस्ररामलिंगतोभद्रादिभेदाःसंतितेग्रंथविस्तारभयान्नोच्यंतइति १ २ ३ प्रतिमायाअष्टविधत्वमाह शैलीदारुमयीलौहीलेप्यालेख्यासैकती मनोमयीमणिमयीप्रतिमाष्टविधास्मृतेति ४ अथयाहनादिपूजामंत्रानाह स्पष्टोर्थः ५ ६ ७ ८ ९ १० ११ १२ ७

१३ १४ १५ १६ १७ १८ २५ वनस्पतेरयंवानस्पत्यः आवघ्राणंकर्नुयोग्यः आघ्रेयः २६ २७ २८ जातिर्जातिफलं तुर्यंचतुर्थं रव

गंगाचयमुनाचैवगोदावरीसरस्वती नर्मदासिंधुकावेरीसरयूर्गंडकीतथा १३ नाम्नपर्णीभीमरथीकृष्णावेणीमहानदी गोम
तीसागरःसप्तपयोष्णीभवनाशिनी १४ पूर्णातापीतुंगभद्रासिप्राबेगवतीतथा पिनाकीप्रवरासिंधुफेनास्तेपिनदाः शुभाः १५
इत्यादिसर्वतीर्थेषुयत्तोयंवर्तनेशुभं तन्मयानीतमद्यात्रस्नानकुरुरघूत्तम १६ पुनराचमनरम्यंसर्वतीर्थसमुद्भवं गृहाणरघु
नाथत्वदीयनेपन्मयातव १७ स्फवर्णंतंतुभिश्चित्रंपीतकोशेयसंभवम् वस्त्रयुग्मंप्रदास्यामिगृहाणरघुनायक १८ शुद्धं
हेममयरम्यंनवतंतुसमुद्भवं ब्रह्मग्रंथिसमायुक्तंब्रह्मसूत्रंप्रगृह्यता १९ मुकुटकुंडलेरम्येमुद्रिकाःककणेतथा नूपुरेरसना-
मालाःकेयूरेरत्नमंडिते २० इत्यादीन्परमान्दिव्यान्स्वर्णमाणिक्यनिर्मितान् त्वदर्थंचमयानीतान्लंकारान्गृहाणभो २१
छत्रंचव्यजनरम्यंचामरद्वयसंयुतं त्वदर्थंचमयानीतंगृण्हीष्वरिपुसूदन २२ सुगंधचंदनादिव्यंकृष्णागरुविमिश्रितं
रक्तचंदनसंयुक्तंचंदनप्रतिगृह्यताम् २३ अक्षताश्चवराटदिव्यामुक्ताफलविनिर्मिताः करस्थयाकुंकुमेनाक्तागृहाणप
रमेश्वर २४ माल्यादीनिसुगंधीनिमालत्यादीनवेप्रभो मयाहृतानिपूजार्थंगृहाणरघुनायक २५ वानस्पत्योरसोधूपो
गंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यताम् २६ साज्यंत्रिवर्तिसंयुक्तंवन्हिनायोजितंमया दीपंगृहा-
णभोरामत्रैलोक्यतिमिरापह २७ भक्ष्यंभक्तेनसंयुक्तंपायसंघृतसंयुतं शर्करामधुसंयुक्तंनैवेद्यंप्रतिगृह्यताम् २८
पूगीफलसमायुक्तंनागवल्लिदलैर्युतं जातिपूर्यसमायुक्तंनागवूलंप्रतिगृह्यताम् २९ हिरण्यब्रह्मसंभूतंवन्हितेजःस
मुद्भवम् दीयतेदक्षिणार्थंतेगृण्हीष्वरघुनंदन ३०

दिरं तृतीयस्य अनुक्तत्वाच्चूर्णंग्राह्यमिति जातिफलस्यसाहचर्यादेलालवंगादिकमपिबोध्यम् २९ ३० ७ ७

१ मंदारशब्देनपारिजातादिकल्पवृक्षपुष्पाणिग्राह्याणिविष्णुपूजनेऽर्कस्यनिषेधात् दमनःभाषायांदवणेतिप्रोक्तः मुनिः

एवंमयाषोडशचोपचाराःसविस्तरंतेकथिता नृपात्र आवाहनाद्याश्चहिदक्षिणांताःशेषांचपूजांसकलांतुवक्ष्ये ३१ इ
तिश्रीभविष्योत्तरपुराणेऽयोध्यारवंडेचैत्रमाहात्म्येषोडशोपचारविस्तारोनामैकादशोऽध्यायः ११ मांडव्यउवाच
पंचवर्णिसमायुक्तंकपिलाज्यविमिश्रितं वन्हिनायोजितंरम्यंगृण्हीष्वत्वंनिराजनं १ जातीचंपकमंदारैरकेतकीतुलसीन
था दमनोमुनिकुंदैश्चत्यनंतेचेतिवैनव २ एभिर्नवविधैःपुष्पैर्मंत्रपुष्पाणिराघव मयार्पितानिगृण्हीष्वप्रसीदपरमेश्वर
३ यानिकानिचपापानिजन्मांतरकृतानिच तानिसर्वाणिनश्यंतुप्रदक्षिणपदेपदे ४ उरसाशिरसादृष्ट्यामनसावचसा
तथा पद्भ्याकराभ्यांजानुभ्यांसाष्टांगंचनमोस्तुते ५ आवाहनंनजानामिनजानामिविसर्जनं पूजाचैवनजानामिक्षम्य-
तांपरमेश्वर ६ मंत्रहीनंक्रियाहीनंभक्तिहीनंरघूत्तम यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे ७ तीर्थादिदेवान्संस्मृत्यपु
नरर्घ्यंप्रदापयेत् गंधपुष्पफलैर्युक्तंभक्त्यानत्परमानसः ८ व्रतिनश्चैत्रमासेस्मिन्स्नातस्यविधिवन्मम गृहाणार्घ्यमया
दत्तंसीतयारघुनंदन ९ ततश्चब्राह्मणान्भक्त्यापूजयेद्वेदपारगान् गंधपुष्पैःसतांबूलैःप्रणमेच्चपुनःपुनः १० तीर्था
निदक्षिणेपादेवेदास्तन्मुखमाश्रिताः सर्वांगेष्वाश्रितादेवाः पूजितास्तेनतर्पिता ११ अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणा
भुवि नावमान्यानोविरोध्याःकदाचिच्छुभमिच्छता १२ ततोहरिप्रियांदेवींतुलसींपूजयेद्व्रती प्रदक्षिणांनमस्कारान्
कुर्यादेकाग्रमानसः १३ देवैस्त्वंनिर्मितापूर्वमर्चितासिमुनीश्वरैः नमोनमस्तेतुलसिपापंहरहरिप्रिये १४ मुनिवृक्षपूजयि
त्वागोश्वत्थंतुपूजयेत् ततोग्रेवक्ष्यमाणानिनानादानानिविस्तरान् १५

रगस्तिपुष्पंकुंदंबृहज्जातिपुष्पंअ-

नंतपुष्पंविष्णुक्रांता २ ३ ४ ५ ६ ७ ८ ९ ब्राह्मणप्रशंसामाहत्रिभिः १० ११ १२ १३ १४ १५

रामकथारामायणकथावाचैत्रमाहात्म्यप्रशंसिनीचैत्रमाहात्म्यकथा १६ व्यासास्यान्श्रीवेदव्यासमुखात्विनिर्गता व्यासोक्ताइत्यर्थः ननुदेशभा
षारचितरामकथानच्छ्रवणस्यनिषेधात् तदुक्तंपाद्मेनदेशभाषारचितंग्रंथंश्रुत्वाफललभेदिति १७ योगान्योगिनः १८ १९ २० २१

यथाशक्तिप्रदेयानिव्रतिनाव्रतपूर्तये ततोरामकथादिव्याचैत्रमासप्रशंसिनी १६ श्रोतव्याचप्रयत्नेनव्यासास्याच्चवि
निर्गता तदुक्ताचारनियमाःकार्याश्चैवव्रतोद्भवाः १७ ब्राह्मणान्समुनीन्योगान्व्यासंचैवप्रपूजयेत् ततःशिष्टान्य-
तीनसर्वानुवानप्रस्थस्थितान्द्विजान् १८ पूजयेच्चयथाशक्तिनतोगच्छेज्जलाशयम् स्नात्वामध्यान्हसमयेसंध्याकृत्वा
यथाविधि १९ तर्पयेच्चऋषान्सर्वान्ऋषीन्सर्वांश्चतर्पयेत् ततःसर्वान्पितॄंश्चापितर्पयेत्तिलसंयुतं २० कृत्वापसव्यपूर्वंतु-
हस्तन्यस्तपवित्रकः यावतश्चैत्रमासोहिवर्त्ततेपितृतर्पणे २१ तिलास्तत्संख्यकाह्यानिपितरःस्वर्गवासिनः ततोनि-
मंत्र्यविप्रान्वेदयाज्ञशक्तियतीन्शुभान् २२ स्वगृहंचततोगत्वाव्रतीसंतुष्टमानसः समर्पयित्वानैवेद्यंकरेभ्यःप्रमदाकृतम्
२३ संस्कारार्थंहिचान्नस्यवैश्वदेवंततश्चरेत् बलिदानंततोदत्वादत्वाकाकबलिंबहिः २४ लक्षयेदतिथेर्मार्गंयाव
द्गोदोहनंभवेत् तस्मिन्कालेतुयःप्राप्तोत्यतिथिःसहरिश्चसः २५ अदृष्टपूर्वमार्गस्थःप्राप्तस्तात्कालिकश्चयः त
मत्वावासुदेवंहिनत्वाचैवपुनःपुनः २६ आसनेचोपविश्याथपूजयेत्तंयथाविधि पादावनेजनंकृत्वाधारयेन्मूर्द्धकेनि
जे २७ निमंत्रितान्समाहूययतीन्विप्रान्समर्चयेत् प्रथमंविप्रतीर्थंहियतितीर्थंततःस्मृतं २८ देवतीर्थंततोप्रा-
त्यमेवतीर्थंविनिर्णयः तेनस्तान्पूजयेत्सर्वानुपचाराष्टसंयुतैः २९ द्रव्येर्नानाविधैःश्रेष्ठैर्भक्त्यानत्वापुनःपुनः गंध-
धाःपुष्पाणिधूपंचदीपंनैवेद्यमेवच ३०

यतीन्स्वधर्मपालनेयत्नशीलान्चकारात् यतीन् संन्यासिनश्च २२ २३ २४
२५ २६ २७ २८ २९ ब्राह्मणपूजनेअष्टोपचारानाह गंधपुष्पाणीति ३० ७ ७ ७

पतिपूजनेषडुपचारानाह ३१ ब्रह्मपत्रेषुपालाशपत्रेषु ३२ सहेतिशेषः अथनित्यपूजाविधिः चैत्रव्रतिनांप्रोक्तः नवम्यांविशेषोग्रे व्रतलबकेग्रो
क्तोद्रष्टव्यः इतिटीकायांद्वादशः १२ १ क्षौद्रमधुसौवीरकं बदरीफलकांजिकंच राजमाषाहरितमाषाः चवलासंज्ञकं धान्यंयाग्रादिशब्देनमसूरक्षु

फलंरम्यंचतांबूलंदक्षिणाचेतिचाष्टहि तांबूलदक्षिणाहीनंकार्यंवैयतिपूजनं ३१ कदलीब्रह्मपत्रेषुमधुपत्रेषुचव्रती
करोतुभोजनंचैत्रेकास्यपात्रंविवर्जयेत् ३२ एवंकृत्वापूजनमासिचैत्रेब्राह्मिष्ठानान्यासिनांभूसुराणाम् ततःसोत्र
वक्ष्यमाणविचित्रबालैरिष्टेभोजनंवैकरोतु ३३ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येपंचमूह्याय
स्तवर्णननामद्वादशोऽध्यायः १२ श्रीमाड्व्यउवाच इदानींतेभवक्ष्यामिनियमाव्रतिनामधो येकायास्तान्
शृणुत्वंहिपुण्यकीर्तेनृपोत्तम १ सर्वाण्येतानिमांसानिक्षौद्रसौवीरकंतथा राजमाषादिकंचापिचैत्रस्नायीनभक्षयेत्
२ परान्नंचपरद्रोहंपरदारगमंतथा तीर्थविनासदेवंहव्रतीवासंविवर्जयेत् ३ द्विदलंतिलतैलंचतथान्नंशल्यदूषितं
भावदुष्टशब्ददुष्टंचैत्रस्नायीविवर्जयेत् ४ देववेदद्विजातीनांगुरुगोव्रतिनांतथा स्त्रीराजमहतांनिंदांनाकुर्यात्तुम-
धुव्रती ५ प्राण्यंगंचूर्णमिषंफलंजबीरमामिषं धान्येमसूरिकाप्रोक्ताश्वान्नंपर्युषितंतथा ६ अजागोमहिषीदुग्धा
दन्यद्दुग्धादिचामिषं द्विजक्षीतारसाःसर्वेलवणंभूमिजंतथा ७ ताम्रपात्रस्थितंगव्यंजलपल्वलसंस्थितं आत्मार्थंपा-
चितंचान्नंत्यामिषंतत्स्मृतबुधैः ८ ब्रह्मचर्यमधःस्नातिः पत्रावल्यांचभोजनं चतुर्थकालेभुंजीत कुर्यादेवं सदाव्रती ९

द्रधान्यादिकंच २ परगृहमितिशेषः शल्येनकीटास्थिकेशादिनादूषितम् ४ ५ प्राण्यंगंचूर्णं प्राणिमात्रस्यशरीरमांसखंडं आमिषं
६ भूमिजंसमुद्रजलं विनाकेवलक्षारभूम्युत्पन्नंलवणंआमिष ७ गव्यंगोदधिदुग्धादिकम् पल्वलमल्पसरः तत्रस्थंजलं आ-
मिषं ८ ९ ५ ६ ५ ६ ५

संवत्सरप्रतिपत्संवत्सरारंभः तत्रकालात्मपूजनं अस्यामेव आरोग्यव्रतं विद्याव्रतं तिलकव्रतं नवरात्रीव्रतारंभश्चकुर्यात् १० अस्यांतृतीयायांसौभाग्यशयनव्रतं गौर्यादोलोत्सवः मनोरथतृतीयाव्रतं अरुंधतीव्रतंचकुर्यात् ११ अलांबुभाषायांदुधेयावादुध्याभोपलाइतिख्यातं बृहतीडोरलीफलंस्लेष्मातक भाषायांभोकरे इतिख्यातं कलिंगभाषायांकलिंगडेवातरबुजइतिख्यातं १२ पतितकाश्चअव्रतकाश्चपतिताव्रतकास्तैःद्विजान् ब्राह्मणान्-

संवत्सरप्रतिपदीतैलाभ्यंगंतुकारयेत् चैत्रस्नायीनरोन्यत्रतैलाभ्यंगंनकारयेत् १० चैत्रस्यसितपक्षस्यतृतीयायां तुयोषिताः अभ्यंगश्चविधातव्योनान्यत्रमधुमासके ११ अलाबुचापिवृताकंकूष्माडंबृहतीफलं श्लेष्मातकंकलिंगंचकपित्थंचैववर्जयेत् १२ रजस्वलात्यजेन्नेंच्छैःपतितान्व्रतकैःसह द्विजाद्विद्वद्वदास्येच्चनवदेत्सर्वदाव्रती १३ पलाडुलशुनंचैवछत्राकंगृंजनंतथा नालिकामूलकंशिग्रुवर्जयेच्चमधुव्रती १४ एभिर्दृष्टस्त्वकाकैश्चस्पृतकान्नंचवर्जयेत् द्विपाचितंचदग्धान्नंनैवाद्याच्चमधुव्रती १५ एतानिवर्जयन्नित्यव्रतीसर्वव्रतेष्वपि कृच्छ्राद्यंचप्रकुर्वीत स्वशक्त्यारामतुष्टये १६ क्रमात्कूष्माडंबृहतीछत्राकंमूलकंतथा श्रीफलंचकलिंगंचफलंधात्रीभवंतथा १७ नारिकेलमलाबुंचपटोलंबदरीफलं चर्मवृंताकिकंवल्लीशाकंतुलसिजंतथा १८ शाकान्येतानिवर्ज्यानिक्रमात्प्रतिपदादिषु धात्रीफलरवोनहृर्जयेत्सर्वदा गृही १९ येभ्योऽन्यर्हर्जयेत्किंचित्तद्ब्राह्मप्रीतयेनरैः तत्पुनर्ब्राह्मणेदत्वाभक्षयेत्सर्वदेवहि २० एवमेवहिमाघेपिचैत्रवत्कार्तिकेपिच सर्वेष्वपिचमासेषुकुर्याद्धेनियमंव्रती २१ ऊष्णोदकंचतांबूलंनैलमेथुनमेवच दिवास्वापंकास्यभोज्यंद्यूतंव्यायाममेवच २२

द्विषंतिते द्विजाद्विषः १३ छत्राकंभाषायांलघुबाबलिनालिकानारिकेलपुष्पं १४ धृष्टनासिकयाअवघ्रातं द्विपाचितंद्विवारंपाचितं १५ कृच्छ्रायंकृच्छ्रादिव्रतंधर्मशास्त्रप्रसिद्धं १६ क्रमात्प्रतिपदादिपंचदशातिथिषुकूष्माडमित्यादिना नामानिपूर्वोक्तानि १७ चर्ममसूरं १८ १९ २० २१ व्यायामोभ्रमणंश्रमकरणंच २२ ७ ७

क्रीडांशरीरसंस्कारंश्मश्रुकर्मचमर्दनं पारखंडालापवारस्त्रीनटनाट्यविलोकनं २३ मांसंपरान्नंमाषान्नंहिंसाद्विर्भोजनं नथा वर्जनीयानियत्नेनचैत्रस्नानव्रतस्थितैः २४ ययोक्तकारिणंदृष्ट्वाचैत्रव्रतकरनरम् यमदूताःपलायंतेगजाःसिंहादितायथा २५ एकश्चैत्रव्रतस्नायीत्यपरःशतयाजकः नयोःपूर्वोवरःप्रोक्तोत्यपरःक्लेशभाक्पुनः २६ यज्ञकृत्वाप्नुयात्स्वर्गंवैकुंठंचमधुव्रती स्वर्गपातात्पुनर्दुःखंचैत्रस्नायीनजन्मभाक् २७ भुक्तिमुक्तिप्रदानीहयानिक्षेत्राणिभूतले च संतितानितहूद्देचैत्रस्नानविधायिनः २८ दुःस्वप्नादुष्कृतंकिंचिन्मनोवाक्कायकर्मजं मधुस्नानपरदृष्ट्वा नरयांतिक्षयंक्षणात् २९ चैत्रेतुव्रतिनःपुंसोरक्षार्थंग्राहिणोत्करान् महाविष्णुश्चनेसर्वरक्षांतिस्मादिवानिशम् ३० रक्षांकुर्वंतिशक्राद्याराजानंकिंकरायथा विष्णुव्रतकरानित्यंयत्रतिष्ठंतिपूजिताः ३१ ग्रहभूतपिशाचाद्यानेवतिष्ठंतितत्रवै चैत्रस्नानफलवक्तुनसमर्थोस्मिभोनृप ३२ रामप्रियंसकलकल्मषनाशनंच सत्पुत्रपौत्रधनधान्यविवृद्धिकारी चैत्रव्रतंसनियमंकुरुतेमनुष्याःकिंतस्यतीर्थपरिसेवनदेहदंडैः ३३ इतिश्रीभविष्योत्तरपुराणेअयोध्यारखंडेचैत्रमाहात्म्यंचैत्रव्रतनियमकथनंनामत्रयोदशोऽध्यायः १३ ७ मांडव्यउवाच इदानीतेप्रवक्ष्यामिभोजनादुत्तरंविधिम् तंशृणुष्वनृपश्रेष्ठपुण्यकीर्तेःसुखप्रदम् १ भोजनंचैवसंपाद्यमुखशुद्धिंविधायच एलालवंगविस्वादियतिभ्योमुखशुद्धये २ दत्वानानुवदयित्वाचततस्तांश्चविसर्जयेत् तांबूलंश्चप्रदातव्याविप्रेभ्यस्तदनंतरम् ३ दक्षिणांचततोदत्वाततस्तांश्चविसर्जयेत् ततोनानाचरित्राणिविष्णोःशृण्वन्दिनक्षयः ४

इतिटीकायांत्रयोदशः १३ ७ १ विश्वासुंठीशीतादिव्याधिशमनार्थंआदिशब्देनमरिचिसैंधवादिकंचअल्पचनार्थं २ ३ ४

५ ६ वासंतिकींवसंतपूजां ७ ८ ९ अष्टोपचारकैः गंधपुष्पाणि धूपंच दीपंनैवेद्यमेवच फलरम्यंचतांबूलोदक्षिणांचेतिचाष्ट
कमिति १० सिकताशर्करा ११ पंचखाद्यंखर्ज्जूराक्रोडबादामादिकं १२ १३ १४ १५ १६ १७

नीत्वासंध्यांततः कृत्वानिशाहोमंचकारयेत् देवान्संपूजयेदष्टप्रकारैः पूर्वसूचितैः ५ नीराजनंमहत्कृत्वादेवान्स
म्यक्प्रसादयेत् नानोपचारैःसद्विप्रान्पुनःशक्त्याप्रतोषयेत् ६ पूजावासंतिकीकर्त्तुमंडपान्कारयेच्छुभान् नानावृ
क्षोद्भवैःपत्रैराच्छाद्यसद्नागणं ७ तन्मंडपाधोभूम्यानुजलैर्भूमिंतुसेचयेत् प्रसार्यसिकतास्तत्रस्थूलशर्करवर्जिताः
८ आच्छाद्यचसितैर्वस्त्रैस्तत्रविप्रान्प्रपूजयेत् प्रक्षालयित्वापादौतुसीतलैर्निर्मलैर्जलैः ९ पादावनेजनजलंमस्त
केधारयेद्व्रती चर्चयित्वाचंदनेनविप्रानष्टोपचारकैः १० पूजयेच्चव्रतीसम्यक्चैत्रव्रतफलाप्तये विंशतिंश्चण-
कान्रम्यान्जलार्द्रान्सिकतायुतान् ११ पंचखाद्यादिसंमिश्रान्नैवेद्यार्थंददेद्व्रती ततोरंभाफलान्येवनाम्रपा-
त्रस्थितानिच १२ गोधूमधान्ययुक्तानिदक्षणाभिश्चषोडश वस्त्रेणाच्छादयित्वातुतेभ्यःप्रत्येकमर्पयेत् १३ पान
कंतुततोदत्वारम्यमरिचामिश्रितं शर्करासहितंयोग्यंरचितापोपशांतये १४ ततोहीक्षुरसान्दद्याद्दद्याद्धेनोरसान्शु
भान् दद्याज्जंबीरफलजान्रसान्दिव्यान्शुभावहान् १५ जंबूफलानिवेदत्वाताम्बूलादिसमर्पयेत् निक्षिप्यपुष्प
हारान्हिकंठेचैत्रव्रतीनरः १६ प्रत्येकंह्रिजवर्येभ्योदत्वाव्यंजनमुत्तमम् नानोपचारसयुक्तोज्वलकुंभश्चदीयतां १७ उर्वा
रुकफलैर्युक्तःसवस्त्रश्चसदक्षिणः ततोनत्वाचतान्सर्वान्भूसुरान्हिविसर्जयेत् १८ एववासंतिकीपूजांकृत्वाचैत्र
व्रतीनरः सार्द्धयामंविलघ्याथशुद्धभूम्याजितेंद्रियः १९

उर्वारुकफलैः भाषायांकांकडीतैः १८ एवंवासंतिकींवसंतपूजांकृत्वासार्द्धयामरात्र्यनंतरंस्वपेदितिअत्रविशेषः विधानमालायां १९ ७

२० २१ २२ २३ २४ २५ २६ अध्वगानांमार्गचारिणां २७ यःसलिलाकांक्षीतस्मैसलिलंदेयंएवमग्रेपिसंबं

संस्मरन्सकलान्देवान्शयीतसहभार्यया जलेरक्षतुवाराहःस्थलेरक्षतुवामनः २० अटव्यांनारसिंहश्चस र्वतःपातुराघवः हनूमानजनीसूनुर्वायुपुत्रोमहाबलः २१ रामेष्टःफाल्गुनसखःपिंगाक्षोऽमितविक्रमः उ दधिक्रमणश्चैवसीताशोकनिवारणः २२ लक्ष्मणप्राणदाताचदशग्रीवस्यदर्पहा एवंहादशनामानिकपींद्र स्यमहात्मनः २३ सायंकालेप्रभातेचनिद्राकालेचयःपठेत् सर्वविघ्नहरेत्तस्यसत्यसत्यंवदाम्यहम् २४ एवंस्मृत्वादक्षिणस्यांप्राच्यांवाथसदानरः स्वशिरःस्थापयित्वातु करोतुशयनंततः २५ एवंनित्यंविधिःप्रोक्तो पुण्यकीर्तेमयात्वइदानींसर्वदानानिवक्ष्येचैत्रोद्भवानिहि २६ मार्गेध्वगानांयोमर्त्यःप्रपादानंचचैत्रके मा र्गेछायांतुयःकुर्यात्सस्वर्गेचमहीयते २७ सलिलंसलिलाकांक्षीछायाच्छायामपीच्छति व्यजनंव्यजनाकां क्षीदेयंतस्मात्तुचैत्रके २८ जलंछत्रंचव्यजनंदानमीनेविशिष्यते चैत्रमासेतुसंप्राप्तेब्राह्मणायकुटुंबिने २९ अदत्वोदककुंभंतुचातकोभुविजायते चैत्रेदेयंजलंचान्यद्देयाशय्यामनोरमा ३० आदर्शदानंतांबूलगु डदानंचकारयेत् घृतयुक्तकांस्यपात्रदानमिक्षुरसस्यच ३१ गोधूमतुबरीदानंदानंदध्योदनस्यच तथाश्वी फलदानंच दानंचूतफलस्यच ३२

धनीयम् २८ २९ ३० ३१ ३२ ७ ७ ७

सूक्ष्मवस्त्रंपुस्तकंचभेषकंचकमंडलुम् यतीनांदंडदानंवैतैलदानंमठेषुच ३३ हेपुण्यकीर्तिनृपतेमयावैप्रोक्तानिदा-
नानितुचैत्रमासे विधिश्चसर्वःकथितोमयोर्हिकिंभूयस्तृहातेश्रवणोस्तिचित्ते ३४ इतिश्रीभविष्योत्तरपुराणेअयोध्या
खंडेचैत्रमाहात्म्येदानविधिर्नामचतुर्दशोऽध्यायः १४ पुण्यकीर्तिरुवाच हेमांडव्यत्वयाचैत्रमासस्यमहिमाशुभः कथितःपरमःपुण्यःसर्वेषांमुकुटोपमः १ कस्मिन्तीर्थेतुकर्तव्यंचैत्रस्नानंमहाफलम् तत्तीर्थंचमयाख्या
हिविस्तरेणमुनीश्वर २ मांडव्यउवाच शृणुराजन्यवक्ष्यामिचैत्रेतीर्थवरंशुभम् अयोध्यानगरीमध्येस
रयूमध्यमंडिते ३ रामतीर्थमितिख्यातंतच्चात्रदुर्लभंनृणाम् पृथिव्यांयानितीर्थानितानितीर्थानिचैत्रके ४
श्रीरामनगरीस्नातुमायांतिप्रतिवत्सरम् फाल्गुनीपौर्णिमारभ्यस्थित्वायोध्यापुरींप्रति ५ चैत्रस्नानंप्रकुर्वंतियावच्चै-
त्रीतुपूर्णिमा महाघानांमहाघंहियत्सावत्सारकंनिजम् ६ चैत्रस्नानेनवैदग्ध्वातत्तोयानियथास्थले नायोध्यासदृशीचा
न्यापुरीब्रह्मांडगोलके ७ शरयूसदृशंतीर्थनचैत्रेतुस्मृतंबुधैः यथामाघेप्रयागोहिस्नातव्यस्तुमिच्छता ८ अयोध्या
यांरामतीर्थेनथाचैत्रःप्रकीर्तितः कार्तिकेपियथाकाश्यांपुष्करंगंगाजलेस्मृतः ९ अयोध्यायांरामतीर्थेतथाचैत्रःप्र
कीर्तितः द्वारकायांयथाप्रोक्तोवैशाखोगोमतीजले १० अयोध्यायांरामतीर्थेतथाचैत्रःप्रकीर्तितः प्रयागेमास-
मात्रेणयत्फलंमाघमज्जनात् ११ अयोध्यायांरामतीर्थेसकृत्स्नातेनतन्नरैः वैशाखद्वादशभवंपुण्यंयद्गोमतीजले
१२ तत्पुण्यंशरयूतोयेऽयोध्यायांप्राप्यतेनरैः चैत्रमासेत्रिभिः स्नानैःरामतीर्थेनसंशयः १३

६ ७ ८ ९ १० ११ १२ १३ ७ ७ ७

कार्तिकेपंचगंगायांयैःस्नानंद्वादशाब्दकम् अयोध्यायांरामतीर्थेचैत्रेपक्षेणतत्फलम् १४ अयोध्यादुर्लभाचैत्रे
त्रेनराणांपापकारिणाम् तावद्भ्रमंतिपापानियावद्दृष्टानसापुरी १५ सूर्यवंशोद्भवेनात्रराज्ञासासरयूनदी समानीता
त्रयागार्थमयोध्यानगरीप्रति १६ मानसात्सरसःश्रेष्ठात्समानीताचसत्वरम् सरयूश्चेतिनाम्नासासर्वलोकेषुकथ्य-
ते १७ श्रेष्ठायोध्यापुरीपूर्वंविशेषात्सरयूजलात् तत्रापिरामतीर्थेनतन्नृणामुक्तिकारकम् १८ अयोध्यामथुरामाया
काशीकांतीत्यवंतिका पुरीद्वारावतीचैवसप्तैतामोक्षदायकाः १९ विद्धित्वंजगतीपालसर्वासुनगरीषुच प्रथमकीर्त्य
तेसर्वैर्यासाश्रेष्ठापुरीतिच २० यस्यास्मृतानांजंतूनांनपुनर्जन्मसंभवः दृष्टायोध्यापुरीयेनध्यानाचित्तेस्मृतापिवा
२१ अयोध्यानाशयेत्पापंसप्तजन्मसमुद्भवं अयोध्यानगरीमध्येबहुतीर्थानिसंतिहि २२ तत्रापिरामतीर्थेस्यात्सद्
शंनकचित्स्मृतं तस्मात्सर्वप्रयत्नेनराजन्सासरयूंशुभा २३ अयोध्यानगरीमध्येचैत्रेमासेविशेषतः चैत्रमासेतुसं
प्राप्तेस्नानार्थंसरयूंनदीं २४ अयोध्यायारामतीर्थेसमागच्छंतितान्शृणु इंद्राद्याःसकलादेवावसिष्ठाद्यामुनीश्वराः
२५ शेषाद्याःसकलानागागंधर्वापर्वताःखगाः भागीरथ्यादिसरितःसागराःसप्तवैनदाः २६ पुष्कराद्यानितीर्थानिगौर्या
दिसकलास्त्रियः किन्नरागुह्यकाःसिद्धाःसाध्याश्चाप्सरस्तथा २७ दिवोदासादिकाभूपायेयेश्रेष्ठाःशुभावहाः लो-
कपालाश्चदिक्पालारसातलनिवासिनः २८ स्थावराजंगमाःसर्वेनानारूपधराःशुभाः नाकलोकोद्भवाःसर्वेप्रत्यलोकस्थि
ताश्चये २९ तेसर्वेपिसमायांतिचैत्रेयोध्यापुरींप्रति तत्रास्थित्वामासमात्रं कृत्वास्नानमधोक्षजम् ३०

नदाः शोणभद्रादयः २६ २७ दिवोदासः काशिक्षेत्रस्थः २८ २९ ३० ७ ५

दृष्ट्वाचैत्रस्यपूर्णायांतथाश्रीरामजन्मनि नानाविधानुत्सवान्हितनोयांतियद्यास्थलम् ३१ तस्मात्सर्वप्रयत्नेन चैत्रेमासिनरोत्तमैः अयोध्यासर्वदासेव्याइहामुत्रफलप्रदा ३२ अयोध्यासदृशंतीर्थंचैत्रमासेनृपोत्तम सर्वपापक्षयकरंनभूतंनभविष्यति ३३ यत्रश्रीराघवःसाक्षादवतारंचकारह तत्तीर्थसदृशंतीर्थंपृथिव्यांनहिवर्त्तते ३४ एवमयाश्रीरघुवीरपुर्याःसविस्तरंतेकथितःप्रभावः तथाचतद्वैसरयूमहत्त्वंश्रीरामतीर्थंकथितंचचैत्रे ३५ इतिश्रीभविष्योत्तरपुराणेअयोध्यारखंडेचैत्रमाहात्म्येअयोध्यापुरीवर्णनंनामपंचदशोऽध्यायः १५

पुण्यकीर्तिरुवाच हेमांडव्यमुनिश्रेष्ठयत्त्वयापरिकीर्तितम् अयोध्यायांरामतीर्थंतथासासरयूनदी १ तत्तीर्थंनसमीपस्थंजनानांदूरवासिनाम् तेषांचैत्रमासिस्नानार्थंकउपायोविधीयताम् २ कृतीर्थंतेश्वस्नात व्यतद्वदस्वमुनीश्वर मांडव्यउवाच शृणुराजन्प्रवक्ष्यामिनानादेशेषुयेजनाः ३ तेषास्नानंकथंसिद्ध्येत्तद्वदामि शृणुष्वतत् स्नात्वाचैत्रसमीपस्थंमुक्ताकार्याणिमानवैः ४ सहस्राण्यपिगतव्यंश्रेष्ठायोध्यापुरीप्रति अशक्तानांवृद्धानांदरिद्राणांचरोगिणाम् ५ अयोध्यानगरीगंतुमशक्तानांनृजन्मिनाम् तेषांतुचैत्रेस्नानार्थमुपायंवच्मितच्छृणु ६ अयोध्यायायदाभावोतदारामकृतानिच पृथिव्यांयानितीर्थानितत्रस्नानंविधीयताम् ७ पुण्यकीर्तिरुवाच रामचंद्रेणभूम्यांहिकृतीर्थानिवैकदा कृतानितानिसर्वाणिविस्तराद्वक्तुमर्हसि ८ मांडव्यउवाच यदासरावणंहंतुंरामचंद्रश्चदंडके ययौनिजपितुर्वाक्यात्सबंधुःसहभार्यया ९ स्थित्वाचनवदशाब्दानितीर्थानिसकलान्यपि चकारनिजनामाहिशृणुतानिनृपोत्तम १०

५ ६ ७ ८ ९ १० ७ ५ ६

वत्कालात् चतुर्दशवर्षपर्यंतंदंडकारण्यवास कालादन्यकालेरावणंहत्वा अयोध्यायामागमनानंतरंचतुर्दिक्षुयात्राकरणकाले ११ १२ मुद्गलाश्रमो

तत्कालादन्यकालेपि यत्रयत्ररघूत्तमः भूम्यांगतस्तत्रतत्रचकारनिजकीर्तये ११ तीर्थानिबहुधाराजन्मुक्तार्थैसर्व देहिनाम् चैत्रस्नानंतेषुकार्यंनरैस्तानिनृपशृणु १२ नैमिषेरामचंद्रस्यतीर्थमस्तिमहान्हृदे हरिहारप्रयागेचगया यांमुद्गलाश्रमे १३ क्षेत्रंहरिहरेरम्येकाश्यांगंगाब्धिसंगमे वैजनाथस्यक्षेत्रेहिजगन्नाथस्यलेशुभे १४ वैकुंठस्य नदीतीरेजरासंधपुरेतथा सीताकुंडसमीपेतुनेपालाख्येशुभेस्थले १५ विंध्याचलगतायत्रस्थितास्तिगिरिजाशुभा तत्स्थलेचित्रकूटेहिश्रृंगवेरपुरेतथा १६ रामनामगिरौतद्वत्तथाचामरकंठके वर्तंतेसर्वतीर्थेषुचैत्रेषुजगतीतले १७ कृतानिरामचंद्रेणतीर्थानिविविधानिच मातृपुर्यांपयोष्ण्यांतुपूर्णायांविरजास्थले १८ तथादेवगिरौरम्यघृषणेशस्थलेनथा शरभंगाश्रमेचैवसुतीक्ष्णस्याश्रमेतथा १९ अगस्तेराश्रमेचैवपंचवट्यांचत्र्यंबके पुण्यस्तंभेकन्येशस्यसन्निधौमध्यमेश्वरे २० प्रवरासंगमश्रेष्ठेप्रवासेगौतमीतटे रामह्रदप्रतिष्ठानेरामपुर्यांचचान्नके २१ किष्किंधातीर्थसान्निध्येगोदासागरसंगमे तथापरायांश्रीरामपुर्यांगोदावरीतटे २२ निवृत्तिसंगमेकृष्णातीरेश्रीमल्लिकार्जुने चर्त्तनेरामतीर्थानिरामचंद्रकृतानिहि २३ पंपासरोवरेऋष्यमूकाद्रौस्वामिसन्निधौ पिनाक्यांतुंगभद्रायांशेषाद्रौनृसिंहपत्तने २५ शिवकांच्यांविष्णुकांच्यांपक्षितीर्थेरुणाचले शंखमुख्यांचश्रीरंगेकुंभकोणेऽथपट्टने २५ तथावेनवपाषाणेसेतौरामेश्वरांतिके धनुष्कोटौतथादर्भशयनेसिंधुसंगमे २६ ताम्रपर्णीतटेरम्येतथारामपुरेशुभे कन्याकुमारीनिकटेसप्तसेंद्रेचादिकेशवे २७

महाराष्ट्रदेशे १३ १४ १५ १६ रामनामागिरौरामटेकेनागपुरसमीपे १७ १८ १९ २० २१ २२ २३ स्वामिसन्निधौकर्नाटकदेशमध्येकुमारस्वामिसन्निधौ द्रविडदेशेनृसिंहपत्तने नृपतिग्रामे २५ २५ २६ केरलमलयदेशस्थरामतीर्थान्याह २७

घृतमालाइत्यत्रकृतमालाइतिपाठः समीचीनःलोकप्रसिद्धत्वात् २८ २९ ३० कोकणदेशस्थरामतीर्थान्याह हरिहरेशेत्यादिना महाराष्ट्रदेश ४।

घृतमालानदीतीरेपद्मनाभांतिकेशुभे धर्मक्षेत्रेमत्स्यतीर्थेजनार्दनसमीपतः २८ मधुरायांचोल्लगिरौच्यंकटेशांतिकेतथा श्रीरंगपट्टनेरम्येरामनाथपुरेवरे २९ सुब्रह्मण्येचगोकर्णेश्रीगिरौपरमेशुभे वर्त्ततेरामतीर्थानिरामचंद्रकृतानिच ३० हरिहरेशसंस्थानेधूमाद्रौचमहाबले कोल्हापुरेमहाश्रेष्ठेकरवीरपुरेतथा ३१ नुलजायाश्चवैक्षेत्रेपांडुरंगांतिकेतथा निरायाःसंगमेचापिजंबुक्षेत्रांतिकेतथा ३२ सप्तश्रृंगेरामशय्यागिरौताप्यब्धिसंगमे रेवायाःसागरस्यापिसंभेदेपरमेशुभे ३३ प्रभासेद्वारकायांतुपुष्करेबदरीवने मथुरायांकुरुक्षेत्रेत्यवंत्यांपर्वताख्ये ३४ एवमादिषुतीर्थेषुनानाक्षेत्रेषुभोनृप कृतानिरामतीर्थानिसंतिरामेणसादरम् ३५ एतेषुतीर्थेषुवरेषुचैत्रेयदात्वलाभोरघुवीरपुर्याः स्नानंनदानंकरणीयमत्रयेषांचयत्रच समीपमस्ति ३६ इतिश्रीभविष्योत्तरपुराणेअयोध्यारखंडेचैत्रमाहात्म्येनानारामतीर्थवर्णनंनामषोडशोऽध्यायः १६. पुण्यकीर्तिरुवाच यदारण्येविदेशेवाबंदिगेहेगतापिवा दुर्दैन्यवशगातेवातस्यस्नानंकथंभवेत् १ मांडव्यउवाच यत्रायोध्यापुरीनास्तिस्नानार्थंसरयूर्नच रामतीर्थंनयत्रास्तिकुर्यात्तीर्थांतरेतदा २ अन्यतीर्थाभिषवणेचिंतयेत्सरयूंनदीं अयोध्यायारामतीर्थरामस्नानंतनश्चरेत् ३ तीर्थेचापिनयेषांहितदासर्वनदीषुच तद्भावेतदाकेषुकूपेवापिप्रकारयेत् ४ अन्यत्तेवच्मिराजेंद्रविपत्तौमानवैर्भुवि राममूर्त्तेश्चतीर्थेहिनिक्षिप्यान्यजलेषुहि ५ स्नातव्यरामचंद्रस्यध्यानंकृत्वायथाकथंचित् एवंराजन्मयाप्रोक्तंकिमन्यच्छ्रोतुमिच्छसि ६

न्याह कोल्हापुरेइत्यादिना कोल्हापुरइत्याख्यया प्रसिद्धेकरवीरपुरे ३१ गुर्जरदेशस्थान्याह ताप्यब्धिसंगमेत्यादिना ३२ ३३ ३४
३५ इतिटीकायांषोडशः १६ ५ १ २ ३ ४ ५ ६ ७ ८

७ सहेतिशेषः ८ ९ १० अङ्गकारव्येचंद्रपुरे गोदानाभौ भाषायांनांदेडइतिख्यातं तत्समीपे ११ १२ निवासाख्येपुरे भा-

पुण्यकीर्तिरुवाच श्रुतंत्वन्मुखतःसर्वंचैत्रमासस्यवर्णनम् इदानींतवपृच्छामियेनमेसंततिर्भवेत् ७ मांडव्य उवाच पुण्यकीर्तेनृपश्रेष्ठगच्छायोध्यांपुरींप्रति भार्ययामासमात्रहिकुरुचैत्रवरव्रतम् ८ संततिंप्राप्स्यसिक्षिप्रंयथा प्रापपुराद्विजः नृसिंहनामाचैत्रस्यस्नानेनसहभार्यया ९ पुण्यकीर्तिरुवाच कोनृसिंहश्चकुत्रस्थःचैत्रस्नानंकथं-कृतम् कथंजातापुत्रलब्धिस्तत्सर्वंत्वंवदाधुना १० मांडव्यउवाच अङ्गकारव्येपुरश्रेष्ठेगोदानाभौविराजिते उपाध्यायोपनाम्नाहद्विजःकाश्यपगोत्रजः ११ नृसिंहाख्यश्चतस्यासीच्छुद्धमोनाम्नीप्रियासती जरयाग्रसितश्चा पिसंततिंनालभच्चसः १२ स्वदोषपरिहारार्थमुपायंकर्तुमुद्यतौ निवासाख्ये पुरेगत्वादंपतीमोहिनीशुभा १३ दृष्ट्वादे व्याश्चतौसेवांनित्यंतत्रप्रचक्रतुः गतेबहुतिथेकालेवरदासामहालया १४ प्रसन्नातद्विजंभूत्वाप्राहतद्दोषशांतये हेनृसिंहमहाबुद्धेगच्छायोध्यापुरींप्रति १५ तत्रवैसरयूतोयेरामतीर्थेमहत्तमे चैत्रेमासिवसंतर्तौयदास्यान्नीनगोरविः १६ चैत्रस्नानंप्राप्तमेकंकुरुतत्रद्विजोत्तम पातकंसकलंत्यक्त्वापुत्रंप्राप्स्यस्यनुत्तमं १७ इतिदेव्यावचःश्रुत्वाद्विज श्चिंतापरायणः ययौमार्गेत्तदिध्यायन्नयोध्याख्यापुरींशुभां १८ चिंतयापरयाव्याप्तःकथंगंतुंहिशक्यते मयायोध्यापुरीं दूरंपितृकृष्टंचजीवितं १९ इतिचिंतायुतोमार्गेकचित्तिष्ठन्कचित्स्वलन् भार्यायाश्चकरेधृत्वाशनैश्चैवययौद्विजः २० एवंगोदावरीतीरंगत्वास्नात्वाद्विजोत्तमः राममूर्तिपुरःस्थाप्यपूजयामासभक्तितः २१ तावत्तस्मैप्रसन्नोभूद्रामोदे व्याःप्रसादतः द्विजंप्राहरघुश्रेष्ठोभोनृसिंहद्विजोत्तम २२

२०

षायांनेवसाइतिसंज्ञेमहाराष्ट्रदेशेपर्वरानदीतटस्थि तत्रगत्वा १३ १४ १५ १६ १७ १८ १९ २० २१ २२

२३ २४ २५ २६ २७ सरामह्रदः साम्राज्यक्षेत्रात् गव्युतिमात्रेपश्चिमेवर्तते २८ २९ ३० ३१

मायोध्यात्वमितोगच्छशृणुमेवचनंशुभम् इतःपूर्वेत्युदूरंहियोजनत्रयसंमितं २३ प्रतिष्ठानाभिधंक्षेत्रं गोदायाउत्तरेन
टे तत्रास्तिरामतीर्थंहिमन्नाम्नाचमयाकृतम् २४ तत्रत्वंगच्छविप्रेंद्रस्नानंशीघ्रंचभार्यया चैत्रमासेवसंतर्त्तौयदाः
स्यान्मीनगोरविः २५ तदाकुरुविशेषेणपूजयित्वाचमांशुभम् पापक्षयःपुत्रलाभोभविष्यतिनसंशयः २६ इत्युक्त्वा
रघुवीरस्तंतत्रैवांतरधीयत यत्रगंगाह्रदोरामःप्रसन्नोभूद्विजायहि २७ तस्मात्सवैरामह्रदोनाम्नासवत्रकीर्त्यते
तदाभवचनाद्विप्रःप्रतिष्ठानपुरंययौ २८ मासमेकंचवैस्थित्वाचैत्रस्नानंचकारह सूर्योदयेसमुत्थायकृतशौचादि
सत्क्रियः २९ स्नात्वातस्मिन्रामतीर्थेजान्हवीतीर्थमिश्रिते रामचंद्रंस्वर्णगिरौ पूजयामासभक्तितः ३० प्रदक्षि
णाःस्वर्णगिरेश्चकारनवप्रत्यहम् नवपुष्पैश्चनैवेद्यैःपूजयामासराघवम् ३१ चैत्रशुक्लतृतीयायांयावद्वैशाख
संभवा तृतीयाशीतलागौरीस्नानंचक्रेद्विजप्रिया ३२ एवमासव्रतंकृत्वासद्विजस्तुष्टमानसः अब्रवीत्प्रतिमार्गेणय
योलक्ष्यासमन्वितः ३३ यावन्मार्गेद्विजोगच्छन्नावद्दृष्टास्त्रिभिर्वरैः पिशाचैःक्षुत्तृषाक्रांतैस्तानुद्धार्यसभार्यया ३४
ययौस्वनगररम्यंगोदानाभिविराजितं पुत्रंप्रापमहच्छ्रेष्ठंरामदासाह्वयंशुभम् ३५ तस्मान्मयातेकथितवरंहिस्नाः
नंमधौतत्सरयूजलेवै पुत्रंस्वरूपंसगुणंवरंत्वंतंप्राप्स्यसिस्वस्यपदस्ययोग्यम् ३६ इतिश्रीभविष्योत्तरपुरा
णेत्रयोध्यारवंडेचैत्रमाहात्म्येप्रतिष्ठानगतरामतीर्थवर्णनंनामसप्तदशोऽध्यायः १७ पुण्यकीर्तिरुवाच
कथंपिशाचयोन्यास्तेमुक्ताविप्रेणवैत्रयः कस्मात्सापाच्चतेसर्वेपैशाचींयोनिमाश्रिताः १

३२ ३३ ३४ ३५ ३६ इतिटीकायांसप्तदशोऽध्यायः १७ १ ५ ७

तत्सर्वंविस्तरेणैवश्रोतुमिच्छामित्वन्मुखात् मांडव्यउवाच शृणुराजन्प्रवक्ष्यामिरंभानाम्नीवराप्सराः२ चैत्रेस्नात्वामहायोध्यांसरयूनिर्मलेजले आर्द्रवस्त्रयुताचारुहास्यालंकारमंडिता ३ गृहीत्वासरयूतोयंरत्नकांचननिर्मिते पात्रेरामेश्वरंसेतौद्रष्टुमौनेनसाजवात् ४ ययौचाकाशमार्गेणपिशाचायत्ततत्त्रयः तस्यार्द्रवस्त्रचांचल्याद्बिंदुभिःप्रोक्षिताश्चते ५ क्रूरस्वभावमुत्सृज्यचाश्चर्यपरमंययुः पूर्वजन्मानुस्मरणमभूत्तेषांतदानृप ६ विस्मयाविष्टचित्तास्तांदृष्ट्वाप्सरसांदिवि बहुधाप्रार्थयामासुस्तान्सापप्रच्छसज्ञया ७ कस्माद्यूयंपिशाचाह्निजातास्तत्कथ्यतांमम इतितत्करुणसंज्ञाप्रेरितास्तेत्रय स्तदा ८ तेषुद्वौवर्तमानंहिकथयामासतुश्चतां शृणुभामिनिचावांहिपूर्वजन्मनिभूसुरान् ९ विरजायासमुत्पन्नौश्रोत्रियान्हरशर्मणः उभावध्ययनकर्तुकश्चिन्नारायणाह्वयम् १० शश्रूषयातोषयित्वागुरुंतत्रैवतस्थतुः नारायणकृतांचारुरूपांचंद्रनिभाननाम् ११ दृष्ट्वापरस्परमत्यबहुधाप्रार्थ्यतास्त्रिय आवाभ्यांचहिसाभुक्ता तस्मात्तंगुरुणाचिरात् १२ आवाभ्याचददौशापस्त्वेचाप्यशपत्क्रुधा युवांचापिकुमारीयपिशाचत्वंगमिष्यति १३ ततोस्माभिस्त्रिभिस्तंमुनिंनत्वापुनःपुनः शापस्यानंतरंलब्धस्तच्छृणुष्वमनोरमे १४ चैत्रमासेनृसिंहाख्यःकश्चिद्विप्रश्चकानने दद्यात्स्नानजपुण्यंतदोद्धारोभविष्यति १५ एवजाताःपिशाचाह्यंतद्दत्तांबुभिः प्रोक्षितास्माद्यवंजाताःपूर्वजन्मस्मृतिःशुभा १६ तत्तेषांवचनंश्रुत्वाज्ञात्वाशापस्यमोक्षणम् सांत्वयित्वाकरेणैवशीघ्रंसन्नृहरिस्त्रिया १७ आगमिष्यतिमांचिंताकुरुतेतिवरांगना ययौरामेश्वरंशीघ्रंपूजयित्वागतांदिवम् १८

१६ नृहरिर्नृसिंहाख्यः स्त्रियालक्ष्म्यासहआगमिष्यतिचिंतांमाकुरुतेतिपूर्वेणान्वयः १७ वरांगनारंभाप्सराः १८

चैत्रमासेत्यतिक्रांतेमार्गेसनृहरिर्द्विजः भार्ययासहितोहृष्टःपिशाचैस्तैस्त्रिभिस्तदा १९ स्थित्वादूरंततेसर्वेनमूचुश्चद्विजोत्तमं नैजंवृत्तंसमस्तंहिशापस्यापिविमोक्षणं २० तच्छ्रुत्वानृहरिर्विप्रस्तान्प्रोवाचमुदान्वितः माभैतव्यंपिशाचत्वाद्यथाशंभुर्द्विजेनसः २१ राक्षसोमोचितःपूर्वंमोचयिष्याम्यहंतथा पिशाचाऊचुः कःशंभुश्चकदामुक्तोराक्षसः कःसविस्तरम् २२ कथयस्वद्विजश्रेष्ठकृपांकृत्वातुकौतुकात् नृसिंहउवाच शृणुध्वंकथयिष्यामियदुक्तंचपुरातनं २३ शिवकांतिपुरीमध्येकश्चिद्विप्रःशुचिव्रतः शंभुनामाचिरकालंतस्थौतत्रसभार्यया २४ सकदाचिद्विनेविप्रश्चैकांबरशिवांतिके पौराणिकमुखाच्चैत्रमासमाहात्म्यवर्तिनीं २५ कथांश्रोतुंसमायातस्तत्रश्रुत्वामहाफलं अयोध्यायांहिचैत्रस्य स्नानात्केवल्यदायकं २६ ततोबहुगतेकालेसस्मरन्तांकथांशुभां ज्ञात्वासमागतंचैत्रंस्वगृहान्निर्गतस्तदा २७ भार्यया सहितोविप्रःशनैर्मार्गेणवैययौ नीत्वांतांजान्हवीरम्यांयावद्ग्रेसगच्छति २८ तावद्दृष्टोहिभिल्लेनकर्कशाख्येनकानने गृहीत्वासशरंचापंधर्षयित्वाचभूस्करं २९ लुलुंठकर्कशःक्रूरोवस्त्रेणैकेनतद्द्विजं मुमोचतस्यपाथेयंगृहीत्वासकलंशुभं ३० द्विजोपिप्रार्थयामासकर्कशंचपुनःपुनः वस्त्रादिकंगृहाणत्वंभक्ष्यपिष्टंददस्वमे ३१ तत्तस्यवचनंश्रुत्वामुक्त्वातद्वस्त्रबंधनं सर्वंददर्शपाथेयंनानाविधमनुत्तमं ३२ तस्मिन्ददर्शसव्याधोदशरंभाफलानिवै अपक्वान्यपिशुष्कानितश्चिच्चेव्यचारयत् ३३ एभिःफलैर्नमेकार्यंजानामिब्राह्मणोत्तमं तर्हिदास्याम्यहंदीनंक्षुधाक्रांतंचसत्रियं ३४ इतिनिश्चित्यसव्याधोददौतानिद्विजन्मने गृहीत्वाभक्षयद्विप्रःप्रारभेभार्यया मधौ ३५

२८ काननेवने धर्षयित्वाबलात्कारंकृत्वा २९ ३० ३१ ३२ रंभाफलानिकदलीफलानि तानिअपक्वानि तत्रापिशुष्कानि ३३ ३४ ३५ ध

तद्बभाफलदानेनकर्कशास्यतदाशुभा जाताबुद्धिःक्षणादेवसात्विकीक्रूरतांगता ३६ एवंपिशाचाःसकलास्तनः परंवि
प्रायतस्मैशुभबुद्धिरासीत् समागतश्चात्रकुतः सपृष्ठवान्विप्रसवैप्राहवनेचकर्कशम् ३७ इतिश्रीभविष्योत्तरपु
राणेश्रयोध्यारखंडेचैत्रमाहात्म्येपिशाचनृसिंहसमागमोनामाष्टादशोऽध्यायः १८ ७ शंभुरुवाच कांचीपु
र्याःसमायातंगम्यतेयोध्यकांपुरीम् चैत्रेमासेऽवगाह्यर्षेसरयूनिर्मलेजले १ इतिविप्रवचःश्रुत्वापुनःप्रप्रच्छकर्कशः
किंलभ्यतेहिस्नानेनतन्मेवदसविस्तरम् २ पुनःप्राहसविप्रेंद्रःकर्कशंभक्तितत्परं स्नानेनमधुमासेहिरघुनाथःप्रसी
दती ३ प्रसादात्सकलान्भोगान्लभतेमानवाभुवि अंतेमोक्षोपिभोभिक्षुलभतेनात्रसंशयः ४ इतिविप्रवचःश्रुत्वा
पुनःपप्रच्छकर्कशः मोक्षस्वरूपंकथयकृपांकृत्वामयोपरि ५ तत्तस्यवचनंश्रुत्वापत्नीप्राहद्विजोत्तमः पश्यपश्य
वरारोहेकौतुकमद्भुतम् ६ यद्बभाफलदानेनचैत्रेमासिवरानने अयंकभिक्षुजातीयःकप्रश्नश्चेदृशःशुभः ७
मोक्षस्वरूपज्ञानार्थंतस्माद्धानुप्रशस्यते इत्युक्तास्त्रियाविप्रः कर्कशंप्राहसादरम् ८ साधुसाधुमहाव्याधसम्यक्प्रश्नः
कृतस्त्वया इदानींप्रोच्यतेमोक्षस्वरूपंतन्निशामय ९ समोक्षस्त्वहिजानीहियतोनास्तिपुनर्भवः इतिविप्रवचःश्रुत्वापुनः
पप्रच्छकर्कशः १० तस्यप्राप्तिर्यथास्यान्मेतद्वदस्वहिजोत्तम शंभुरुवाच शृणुकर्कशतत्प्राप्तिर्यथास्यान्नदृढामुते
११ दारपुत्रगृहादीनांप्रीतिमुत्सृज्यजनार्दने दिवारात्रंचिंतयित्वासर्वंदेहस्यचालकम् १२ आत्मानंबहुपुण्यौघैर्निर्म
लीकृत्यमानसम् तत्स्वरूपेयदानिष्ठेत्समुक्तोनेतरोजनः १३

जवात् वेगात् १४ १५ १६ १७ १८ १९ २० २१ जनस्थानेनासिकक्षेत्रे २२ २३ २४ २५

एवंवदतिविप्रेंद्रेव्याधोमुक्ताशरंधनु शंभुपादौजघान्नत्वात्राहित्राहीतिवैवदन् १४ प्रोवाचद्विजवर्यंसव्याधोमामुद्धरेतिच एतस्मिन्नन्तरेतत्रराक्षसोघोरदर्शनः १५ दुद्रावदीर्घशब्देनयत्रासंस्तत्रयोवने श्रायातराक्षसदृष्ट्वाचकुरुतेतुपलायनम् १६ तावज्जवेनतानूधर्त्तुनिकटं राक्षसोययौ तंदृष्ट्वाविकटंशंभुस्तुष्टिकांसजलांनिजां १७ कृत्वोच्चांप्राक्षिपत्तस्मिन्रामचंद्रस्मरन्मुखे मंत्रितेरामनाम्नावैतत्तोयमधुमासिच १८ तत्स्पर्शाद्राक्षसस्यापिजातापूर्वभवस्मृतिः ततःसराक्षसोदूरस्थित्वाशंभुंव्यजिज्ञपत् १९ मामुद्धरमुनिश्रेष्ठघोराद्राक्षसदेहतः शरणंतेगतोस्म्यद्यजातापूर्वस्मृतिर्मम २० इतिनत्वौतुकदृष्ट्वाराक्षसंप्राहसद्विजः कस्मात्तेराक्षसत्वंहिजातंतत्ववदाधुना २१ राक्षसःप्राहवेगेनशंभुंनत्वानिजंनदा जनस्थानेपुराचाहंविप्रः कर्मपराङ्मुखः २२ प्रतिग्रहपरःपापीदुर्मार्गव्यसनीसदा एतस्मिन्नन्तरेचैत्रे ममभार्यासतीशुभा २३ स्नानार्थेरामतीर्थंहिमामपृष्ट्वागृहाद्ययौ सामार्गेचमयादृष्टाधृत्वामार्गेचनाशुभा २४ प्रोक्तासाचमयारंडेमामपृष्ट्वाकुयास्यसि साप्राहभयभीतानुरामतीर्थंप्रगम्यते २५ मधुमांसेवगाहार्थंनमयादुष्कृतंकृतं एवंश्रुत्वापितद्वाक्यंताडितासामयाबलात् २६ प्रेषितास्वगृहंमार्गात्ततःकालांतरेगते मृतोहंचतदानीतोयमलोकयमानुगैः २७ चित्रगुप्तोपिमां दृष्ट्वाधिक्कृत्वाचपुनःपुनः यमराजंचवैप्राहधर्षयन्भास्वगर्जितैः २८ भोधर्मराजपापोयंचैत्रस्नाननिवारकः भुक्तादोराक्षसींयोनिंनिरयान्भोक्तुमर्हति २९ इतितद्वचनंश्रुत्वायमःप्राहानुगास्तदा भोभटाराक्षसींयोनिंदीयतांनिर्जलेवने ३० पापिनेस्मैचमद्वाक्यात्ततस्तैश्चयमानुगैः दत्वाराक्षसयोनिंमात्यक्त्वाचात्रगतायमं ३१

२६ २७ धर्षयन् भीषयन् २८ २९ अनु पश्चाद्गच्छतिते अनुगाः दूताः ३० ३१ ७ ८

३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ इतिटीकायांएकोनविंशोऽध्यायः १९ पिशाचान्प्रतिनृसिंहब्राह्मणउवाच

तदारभ्यवनेचाहंक्षुत्तृषापरिपीडितः पंचत्रिंशत्सहस्राणिवर्षाण्यत्रस्थितश्चिरम् ३२ किंमयाऽकृतंपूर्वंकृतंयस्माद्वने तव संगनिश्चाद्यवैजातासाधुसंगोगतिप्रदः ३३ इतिनद्वचनंश्रुत्वाशंभुर्ध्यात्वाक्षणंतदा ज्ञात्वातत्कृतपूर्वंराक्षसायन्य वेदयत् ३४ शृणुराक्षसयत्पूर्वंकृतंवैकृतत्यया यस्माज्जातासगतिर्मेवनेनिर्मानुषशुभा ३५ एकादश्यांचैत्रशुक्ले कृत्वान्पच्छ्राद्धभोजनम् ताम्बूलोदक्षिणायुक्तःकट्यांवस्त्रेलयाधृतः ३६ द्वादश्यांप्रातरुत्थायगत्वास्नानंतयाकृतं पतितः सहिताम्बूलोविस्मृत्य गौतमीतटे ३७ दक्षिणासहितोदृष्टःसकेनापिद्विजेनवै गृहीतःसहिद्वादश्यानज्ञात्श्चत्यायपुनः ३८ ताम्बूलदानाद्धरचैत्रमासेजातावनेमेयंहिसंगतिस्ते नस्मान्मधोराक्षसमानवैंहितांबूलदानंकरणीयमेतत् ३९

इतिश्रीभविष्योत्तरपुराणेऽयोध्यारवंडेचैत्रमाहात्म्येताम्बूलदानमाहात्म्यवर्णनंनामैकोनविंशोऽध्यायः १९

५ ६ नृसिंहउवाच इतिशंभोर्वचःश्रुत्वाव्याधःपप्रच्छतंपुनः कानिदानानिकार्याणिचैत्रेतानिवदाधुना

१ शंभुरुवाच शृणुव्याधप्रवक्ष्यामिचैत्रेदानानिमानवैः यानिकार्याणिसमार्थेपरमार्थप्रदानिच २ जीर्णोद्धारोमठानां चघट्टानांकरणं मधो प्रासादकरणंचैववापीकूपादिकस्मृतं ३ मार्गस्थानांछत्रदानंमध्यान्हेतिथिपूजनं करपात्रंयतीनांचगोग्रासंतुगवामपि ४ फलंशाकंचमूलंचकंदपुष्पंतुचंदनम् उशीरंशीतलद्रव्यंकर्पूरंकस्तुरीशुभां ५ दीपदानंधेनुदानंगृहदानमधोस्मृतं गोरसानांपृथग्दानंयतिब्राह्मणभोजनम् ६ स्रुचासिनीपूजनंचरामनामप्रलेखनम् पुस्तकानांतथादानंतथाकुंकुमकेशरं ७ जातीफललवंगंचजातिपत्रीवरांगकं धातकीनागरंधूपंबीजपूरकलिंगकम् ८

१ २ घट्टानांकरणंनदीतीर्थादिषुपाषाणेनसोपानकरणं घाउइतिमहाराष्ट्रभाषामोक्तं ३ ४ ५ ६ ७ ८ ९

९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २०

जंबीरंपनसंचैवकपित्थंमातुलिंगकम् कूष्मांडदानमारामकरणंमार्गशोधनं ९ तनोपानत्प्रदानंचगजवाजिरथादिकम्
एतानिचैत्रमासेतुदानानिकथितानिहि १० इतिशंभुवचःश्रुत्वाकर्कशःप्राहनपुनः चैत्रमासेचुकाःपुण्यनिश्चयस्तानिवद
य ११ शंभुरुवाच त्रिशच्चतिथयःपुण्याचैत्रमासेवनेचर तथापिहिविशेषान्तिथीनांवर्ण्यतेमया १२ चैत्रमासेकृष्ण
पक्षेपंचमीदशमीतथा एकादशीद्वादशीत्रयोदशीचतुर्दशीत्रिस्त्वमावास्या १३ एताः शुभाश्चैत्रकृष्णेमहापातकनाशनाः इदा
नींचैत्रमासस्थसितपक्षोद्भवाशुभाः १४ वर्ण्यन्तेतिथयःश्रेष्ठानराणांहितकाम्यया सांवत्सरप्रतिपदमारभ्यदशमीदिन १५
यावत्तावच्छुभाःसर्वाःस्नानदानादिकर्मणि यत्कृतंचप्रतिपदिस्नानदानव्रतादिकं १६ द्वितीयायांचतत्प्रोक्तंद्विगुणंना-
त्रसंशयः यत्कृतंचद्वितीयायां भक्त्यास्नानादिकंनरैः १७ द्विगुणंतत्तृतीयायांचैत्रमासेसितेनृप एवंसर्वासुतिथिषुयाव-
त्स्यान्नवमीशुभा १८ एवंविशेषोज्ञातव्योयथाग्न्यादिक्षुचर्वणं यथाक्षीरादधिप्रोक्तंदध्नस्तुनवनीतकं १९ नवनीतान्घृ
तंयद्वत्तथातिथिविनिर्णयः चैत्रमासस्तुमासानांनवपक्षःसितोवरः २० सितपक्षेक्रमेणैवयावत्स्यान्नवमीतिथिः तावं
देकैकशः श्रेष्ठाःसर्वासुनवमीवरा २१ यस्याजातोरामजन्मधर्मसंस्थापनायहि तस्मात्तिथिस्तुसाप्रोक्तयाकर्मनिर्मूलन
क्षमा २२ तस्यादत्तंहुतंजप्तंयत्किंचिच्चकृतंशुभम् सर्वंतदक्षयंविद्यान्नात्रकार्याविचारणा २३ प्रतिपद्दिनमारभ्यनवरा
त्रमुपोषयेत् प्रत्यहंरघुवीरस्यपूजनंचैवकारयेत् २४ संवत्सरप्रतिपदिध्वजाः सौधोपरीस्थिताः दिव्यवस्त्रैश्चमाल्यैश्च
मंडिताश्चमनोरमाः २५ रामजन्मसूचनार्थंप्रीत्यर्थंराघवस्यच गृहेगृहेनरैःकार्याः पूजनीयाश्चभक्तितः २६

२१ २२ २३ २४ २५ २६

२७ नानापद्मानीत्यत्रोक्तः आनंदरामायणे अष्टोत्तरसहस्रारव्यरामनोभद्रमुत्तमं सीतारव्यंवालिरवेद्भद्रं मथवान्यन्मनोरममिति ८ ५८

गृहेदेवालयेवाथगोष्ठेवृंदावनेशुभे संमार्जनादिकंनित्यंकार्यंचंदनवारिभिः २७ ततोपाषाणचूर्णैश्चनानापद्मादि
कानिहि लेखनीयानिभूम्यांतुनीलपीतादिवर्णकैः २८ तस्योपरिमहान्रम्यश्चित्रवर्णश्चमंडपः देयोद्वाराणिचत्वारिकार्या
णीतोरणानिहि २९ कदलीस्तंभयुक्तानिचेक्षुदंडयुतानिच नानाघंटाकिंकिणीभिश्चनितान्युज्वलानिच ३० रम्या
दर्शैर्मंडितानिविचित्राणिशुभानिच तस्मिन्हेममयःकार्योमंचकोरत्नमंडितः तस्योपरिमहावस्त्रैः शय्याकार्या
शुभावहा तस्यांषोडशमाषैस्तुप्रतिमाकांचनोद्भवा ३२ द्विभुजारामचंद्रस्यसर्वलक्षणलक्षिता चतुर्विंशतिमाषै
श्चप्रतिमारजतोद्भवा ३३ कौसल्यायास्तथाकृत्वापूजनीयामनोरमा यद्यावित्तानुसारेणपूजयेत्प्रत्यहंनरैः ३४
भेरीमृदंगघोषैश्चतुर्यैर्नृत्यैःसगायनैः नानापक्वान्ननैवेद्यैरुपचारैश्चपूजयेत् ३५ यद्वैवाल्मीकिनागीतंरामायण
मनुत्तमं चतुर्विंशतिसाहस्रंपठनीयंततःशुभम् ३६ प्रतिपद्दिनमारभ्ययावत्तन्नवमीदिनं रामायणंतावदेवपठनी-
यंप्रयत्नतः ३७ सर्वतीर्थेषुयत्पुण्यंसर्वदानेषुयत्फलं रामायणस्यपठनात्तत्फलंनवरात्रके ३८ श्लोकंवाश्लोकपा
दंवायद्रामायणसंभवम् नवरात्रेपठिष्यंतिचैत्रेतेमोक्षभागिनः ३९

एकादशेध्याये पूर्वमेवोक्ता २८ २९

३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

चतुर्विंशतिसहस्रवाल्मीकसंज्ञकरामायणस्य पूर्वमुक्तत्वादत्यरामायणस्यापि पारायणं कर्तव्यमित्याह आनंदरामायणे प्रतिपद्दिनमारभ्य यावन्नवमीदिनं आनंदसंज्ञकंसम्यंपठनीयंमनोरमं नवकांडानिनवभिर्दिनैरेवपठेन्नरः दिवसेदिवसेकांडंपठनीयंप्रयत्नतः अथवाप्रत्यहंसर्गाः पठितव्यास्तु हादः

येश्वत्थमूलेमुनिवृक्षमूलेतथानुलस्याश्वसमीपदेशे पठंतिरामायणमादरेणचैत्रेनरास्तेसकलाविनोभवंति ४० इति श्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येनवरात्रप्रशंसानामविंशतितमोऽध्यायः २० शंभुरुवाच एवंहि प्रत्यहंकार्यंकौसल्यारामपूजनं सपुत्रकानानारीणांतत्रकार्यंमपूजनं १ सपुत्रद्विजवर्याणांविशेषात्पूजनंस्मृतं वस्त्राद्यलंकारयुतंचित्रभोजनभोजितं २ एवंकृत्वाविधिंसर्वंनवम्यांचविशेषतः पूजयित्वारामचंद्रंवाहनारूढमुत्तमं ३ भेरीमृदंगघोषैश्चतूर्यद्वंदुभिनिस्वनैः वारस्त्रीकृतनृत्यैश्चगायकानांचगायनैः ४ एवंनानासमुत्साहमंडितंछत्रशोभितं चामरैर्वीज्यमानंचपुष्यकेस्थितंवरं ५ रामतीर्थांतिकंनीत्वापंचामृतघटैवरैः स्नापयेद्रघुवीरंहि पुण्यतोयैःस्ततःपरं ६ रुद्रसूक्तैर्विष्णुसूक्तैःसहस्रनामभिस्तुवा मांगल्यद्रव्यसंमिश्रैर्जलैस्तमभिषेचयेत् ७ मांगल्यवरद्रव्यैश्चस्नानात्तंमंगलाभिधं प्रोच्यतेमंगलस्नानंतच्चैत्रेदुर्लभंनृणाम् ८ तत्पंचामृततीर्थंतुतीर्थमध्येविनिक्षिपेत् तत्रसर्वैर्जनैःशीघ्रंस्नातव्यंतदनंतरे ९ सहस्रावभृथस्नानैर्यत्फलंप्राप्यतेनरैः तत्फलंरामचंद्रस्यमंगलस्नानकारणात् १० पुष्करादितीर्थेषुगंगाद्याःसरित्स्तथा प्राप्यतेयत्फलंस्नानान्मंगलस्नानकृच्चनत् ११ एवंरामंतुसस्नाप्यसीतायुक्तंप्रपूज्यच पुनःपूर्वोक्तवाद्यादिमंगलैरानयेद्गृहं १२ गृहेरामंपुनःपूज्यरामायणकृतंवरं पारायणंसमाप्याथपुस्तकंपूजयेच्छुभं १३

शशेषस्त्वेकः कदाप्यध्येधिकः सोपिपठेन्नरैःअष्टोत्तरशतैःसर्गैः रामकीर्तनमालिका मेरुयुक्तापठेद्देवंरामाग्रेनवभिर्दिनैः व्यासादिप्रोक्तमथवारामायणमिहादरादिति ४० इतिरीकापांविंशोऽध्यायः २० १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

१४ ५ १६ १७ १८ १९ २० २१ दोलकंहिंदोलकमित्यर्थ- २२ २३

नानोत्सवैर्दिनंनीत्वाकार्यंजागरणंनिशि दशम्यांप्रातरुत्थायभोजयित्वाद्विजान्बहून् १४ पूजयित्वापुनःसर्वगुरुंचनाद्रि
सृजयेत् ततःस्वयंसुहृन्मित्रैःकुर्याद्भोजनमुत्तम १५ एवव्रतंसमारभ्यानंचैत्रस्यनवरात्रके अतस्तन्नवरात्रंहिश्रेष्ठंचैत्रोद्भव
र्कश १६ नवरात्रेपिसारामनवमीपरमार्यदा तत्समानातिथिर्नान्याचैत्रमासेवनेचर १७ एवंचैनद्व्रतप्रोक्तंदिवसैर्नवभिःशु
भम् अन्यच्चापिप्रवक्ष्यामिगौरीव्रतमनुत्तमं १८ चैत्रमासेसितेपक्षेतृतीयायांचनारिभिः स्नात्वामृन्मयदुर्गाहिरम्यंचित्रवि-
चित्रितम् १९ कृत्वाष्टादशधान्यानिवापयेत्तदनंतर पुष्पवृक्षांच्छुभांस्तत्रवापयेत्सर्वतस्ततः २० जलयंत्राणिकार्याणि
चित्राण्यापिविलेखयेत् तूर्यद्वाराणिकार्याणिपूर्ववन्मंडपादिकम् २१ कार्यतत्रघटस्थाप्यसजलपुष्पगुंफितं दोलकंचततो
न्यस्यघटपृष्ठेमहच्छुभ २२ कांचनींराजतींमूर्तिंगौर्याःकृत्वाशुभावहाम् दोलकोपरिसंस्थाप्यमासमेकंप्रपूजयेत् २३ अ
शक्तौतामजाकुर्यात्कारयेत्तांवापिकारयेत् प्रत्यहंमंगलद्रव्यैःपूज्यासासर्वनारिभिः २४ कृवासिनीपूजनंचकार्यंनित्यंदिने
दिने कृवासिनीनादेयानिवायनानिशुभानिच २५ वासनिकायापूजायायोविधिःक्रियतेनरैः कृवासिनीपूजनेस्कार्यः
स्त्रीभिर्निरंतरम् २६ निरंतरपूजनार्थंयदिशक्तिर्नवर्तते तदाकार्यंचैकदिनेसुभगानांप्रपूजनं २७ कृवासिनीभ्योदेयाहि
प्रत्यहंभोजनंवरं नानापक्वान्नसंयुक्तंघृतपायससंयुतं २८ अलंकाराश्चवस्त्राणिकंचुक्यादित्रयंच्छुभं भर्तुरायुष्यमिच्छः
द्विदारैस्तद्दयमुत्तमम् २९ एवंकृत्वामासमात्रंस्नानंतच्छीतलाभिधं स्नातव्याहिमधौस्त्रीभिःस्तृतीयायाःशुभप्रद ३० क
र्कशउवाच यत्प्रोक्तंशीतलागौरीस्नानंस्त्रीभ्यःशुभावहं कस्मिंस्तीर्थेचतत्कार्यंतत्त्वंवदाद्विजोत्तम ३१

२४ २५ २६ २७ २८ २९ ३० ३१ ७ ७

२५

शंभुरुवाच यत्रयत्रारामतीर्थेवर्ततेजगतीतले सीतातीर्थेतत्रतत्रत्तेयंसीताकृतंनरैः ३२ तस्मिन्सीताभिधेतीर्थेरामतीर्थो
तिकेशुभे नारीभिःशीतलागौरीस्नातव्यानात्रसंशयः ३३ एवस्नात्वामासमात्रंवैशाखेपरमेशुभे सितपक्षेतृतीयायांपूजयि-
त्वाविशेषतः ३४ त्रिंशत्सुवासिनीभ्यस्तुदातव्यंभोजनादिकं गुरुपत्नींनिजांपूज्यतरयेत्सर्वंविसर्जयेत् ३५ एवस्त्रीणाघनंप्रोक्तमा
समात्रप्रसंगतः तिथीनावर्णनेभिल्लसंक्षेपात्त्वमयातव ३६ आभ्योऽन्यासांतिथीनातु महिमानमतःपरम् कथयिष्यामिचै-
त्रस्यसितपक्षस्यतच्छृणु ३७ येचैत्रमासेरघुवीरपूजनंयथामयावैकथितंसविस्तरम् तथाहिगौर्याःशुभपूजनंसदाकुर्वंति
तेस्त्रीहरिलोकवासिनः ३८ इतिश्रीभविष्योत्तरपुराणेअयोध्याखंडेचैत्रमाहात्म्येरामपूजनविधिर्नामैकविंशोऽध्या-
यः २१ ७ शंभुरुवाच चैत्रेमासेसितेपक्षेयावैत्येकादशीतिथिः सावैस्कंदतिथिषुश्रेष्ठाचोपोष्यात्रनिभिः
शुभा १ श्रेष्ठासाह्यादशीज्ञेयातस्यांतुयमपूजनम् कार्यंदध्योदनंदत्वाजलकुंभःप्रदीयतां २ अयंहिराक्षसोयस्यातो
बूलस्यशुभप्रदं दानंचकार्यत्पूर्वंकथितंचत्वाग्रतः ३ तस्मात्तांबूलदानंहिचैत्रमासिप्रशस्यते विशेषतोपिह्यादश्यांसि-
तपक्षेमहार्थदे ४ देयंप्रयत्नतोरम्यसोपस्कारसदक्षिणं भोजनांतेचविप्रायमहासंपत्प्रदायकं ५ तिस्रश्चतिथयःपुण्या
श्रेष्ठाश्चैत्रेप्रकीर्तिताः त्रयोदशीतथाभूतापौर्णिमासीतथैवच ६ यास्वस्नानंचदानंचसर्वंकोटिगुणायकं यैर्नस्नातोचैत्र-
मासोनस्नातंनघरात्रकं ७ तैस्त्यक्तंत्रिदिनंस्नात्वाचैत्रस्नानफलंलभेत् नास्तिश्रेष्ठापौर्णिमाहिसर्वपातकनाशिनी ८
तस्यामुद्यापनंकार्यंचैत्रस्नानफलाप्तये अतःपरंप्रवक्ष्यामिचैत्रोद्यापनकेविधिम् ९

चतुर्दश्यांशुक्लचतुर्दश्यां १० ११ १२ १३ १४ १५ १६ १७ नानामांगल्यकारीणिद्रव्याणि केशप्रसादिनी आदर्शकुंकुमकज्जलां

यंकृत्वासकलंसर्वंचैत्रस्नानंतुजायते उपोष्यचचतुर्दश्यांपूर्ववन्मंडपादिकं १० कृत्वातस्मिन्धान्यराशौकलशंवारिपूरितं स्था
पयेत्तातदुपरिहेमपात्रंस्फविस्तृतं ११ पंचरत्नयुतंस्थाप्यंततोवस्त्रंतुस्थापयेत् तस्मिन्सीतायुतंरामंसोवर्णेविधिपूर्वकम्
१२ भ्रातृभिर्वायुपुत्रेणस्फ्रग्रीवेणसमन्वितं बिभीषणांगदाभ्यांतुतथाजांबवतायुत १३ पूजयेद्देवदेवेशंपरमंगुर्वनुज्ञया
उपचारैःषोडशभिर्नानाभक्ष्यसमन्वितैः १४ रात्रौजागरणंकुर्यात्गीतवाद्यादिमंगलैः ततस्तुपौर्णमास्यांचसपत्नीकान्द्विजोत्त
मान् १५ त्रिंशन्मितानथैकवास्तुशक्त्यावानिमंत्रयेत् ततःस्नात्वापुनःपूज्यसीतारामंविशेषतः १६ नारिकेलानिरम्याणिचंश-
पात्रेषुषोडश पृथक्पृथक्चसर्वेषुस्थापयित्वानरोत्तमैः १७ नानामांगल्यकारीणिक्षिप्यद्रव्याणितत्रहि वस्त्रेणाच्छादनीयानि
सूत्रेणापिसमंततः १८ वेष्टनीयानिविप्रेभ्यस्तानिदेयानिमानवैः एवंषोडशविप्रेभ्योदत्वाचैत्रव्रतस्थितेः १९ वायनानितत:
कुर्याद्धोमंव्रतसमाप्तये अतोदेवाइतिह्याभ्यांजुहुयात्तिलसर्पिषा २० प्रीत्यर्थंरामचंद्रस्यदेवानांचपृथक्पृथक् ततस्तान्भो-
जयेद्विप्रान्पायसान्नादिनाव्रती २१ दक्षिणांचयथाशक्तितेभ्योदत्वाततोनमेत् पुनर्दंडंसमभ्यर्च्यदेवांश्चतुलसींतथा २२
अश्वत्थमुनिवृक्षंचवटंधात्रींप्रपूजयेत् ततोगांकपिलांतत्रहेमशृंगविराजितां २३ कांतक्षुरांताम्रपृष्ठींदोहपात्रसमन्वितां
संपूजयित्वाविधिवत्कृत्वातांहिप्रदक्षिणां २४ गुरुंव्रतोपदेष्टारंवस्त्रालंकारमंडनैः सपत्नीकंसमभ्यर्च्यततोविप्रान्क्षमापये-
त् २५ युष्मत्प्रसादाद्देवेशःप्रसन्नोस्तुयेमम व्रतादस्माच्चयत्पापंसमजन्मकृतंमया २६ तत्सर्वंनाशमायातुस्थिरामेचास्तु-
संततिः मनोरथास्तुसकलाःसंतुनित्यमभार्चनात् २७ देहांतेचेष्वावस्थानंप्राप्नुयादनिदुर्लभं इतिसंप्राप्यतान्विप्रान्प्रसा
द्यचविसर्जयेत् २८

डानि १८ १९ २० २१ २२ मुनिवृक्षंअगस्तिवृक्षं २३ कांतक्षुरांरौप्यक्षुरां २४ २५ २६ २७ २

अर्चांपूजांकपिलासहितांकपिलाधेनुसहितां २९ ३० अन्यानिवक्ष्यमाणानिगृह्यादीनि ३१ ३२ ३३ ततोदिनत्रयंनामपौर्णिमांतंमासव्रतं-
कृत्वा ततः प्रतिपदादितीयातृतीयाइतिदिनत्रयंत्रिजटाप्रीतयेत्रिजटाराक्षसीप्रीतयेकेवलंस्नानंकुर्यान्नव्रतंवक्ष्यमाणश्रीरामचंद्रस्यवरप्रदानत्वात्

तामर्चांगुरवेदद्याद्वस्त्रयुक्तांसदाव्रती कपिलासहितांरम्यांप्रतिमाभिःसमन्विताम् २९ ततोदानानिकार्याणिशक्तोसत्यांस
दाव्रती गोभूतिलहिरण्याज्यवासोधान्यंगुडानिच ३० रौप्यलवणमित्याहुर्दशदानानिपंडिताः दशदानानिकार्याणिततो
न्यानिप्रकारयेत् ३१ गृहशय्यागजाश्वांश्चदासीदासरथादिकं शिबिकारामभूम्यादिददातुचमधुव्रती ३२ ततःसुस्नातृभि
र्युक्तःस्वयंभुंजीतभक्तिमान् एवमुद्यापनविधिश्चैत्रस्नानफलात्मये ३३ सविस्तरश्चकर्तव्यश्चैत्रस्नानपरायणैः ततो-
दिनत्रयस्नानंत्रिजटाप्रीतयेनरैः ३४ कार्यंतत्रैवयस्मिन्हिचैत्रस्नानकृतंवरं आलस्याद्वाप्रमादाद्वामोहाद्वामानवःसुधीः
३५ नस्नातित्रिजटास्नानंचैत्रस्नानंवृथाभवेत् तस्माद्वश्यंकार्यंत्रिजटास्नानमादरात् ३६ एवमयाचैत्रव्रतस्यसर्व
मुद्यापनस्यापिविधानमुक्तं तथातिथीनांचमहात्म्यमुक्तंकानेस्तिचान्याश्रवणेमनीषा ३७ इतिश्रीभविष्योत्तरपुराणेचै
त्रमाहात्म्येश्रयो० चैत्रव्रतोद्यापनविधानवर्णनंनामद्वाविंशोऽध्यायः २२ ७ भिल्लउवाच किमर्थंचैत्रकृष्णासापंच
मीकथितात्वया वरिष्ठेतिपुराशंभोतस्याः कथयविस्तरं १ शंभुरुवाच फाल्गुन्यांपौर्णमास्यांतुधुंडासाराक्षसीपुरा न
गरेषुचसर्वेषुपीडयामासबालकान् २ सापुनर्बालकैःसर्वैर्लज्जाकारिवचोक्तिभिः मूत्रहस्तोद्भवैर्वाद्यैर्यैःकृताधर्षितापिच ३
धूलिभिःशिशुमुक्ताभिर्व्याप्तासापतिताभुवि तस्यांदेहोपरित्यक्तमहाकाष्टादिभिर्जनैः ४ ज्वालितासापौर्णमास्यांपुरातस्मा
च्चतद्दिने प्रतिवर्षंज्वालनीयामंत्रमुल्कानुमानवैः ५

तस्यैस्नानंजपुण्यंदद्यादित्यर्थः एतच्चैत्रसाहचर्यात्सर्वमासव्रतेषु

विज्ञेयमिति ३४ ३५ ३६ ३७ इतिटीकायांद्वाविंशोऽध्यायः २२ ७ १ २ ३ ४ ५

६ ७ ८ ९ १० होलिकाभूमिवंदनमंत्रः ११ तुषारसमयेशिशिरकृतौवृत्तेपरावृतेगतेसतिप्राप्तः प्रतिपदायांवसंतऋतौप्राप्तेचंदनेनसह चूतकुसुममंञ्जरीपुष्पसंप्राश्यपिबायः पिबतिसःसमांवर्षपर्यंतंसुखीस्यात् १२ पानसमयेप्रार्थनामंत्रः १३ तस्यामेवचांडालंस्पृष्ट्वावश्यंस्नानंकुर्यादिति

दीपयाम्यद्यतेघोरांचिंतिंराक्षससत्तमे हितायसर्वजगतांप्रीतयेपार्वतीपतेः ६ अस्मत्कृतंतनसंभस्तेःकृतास्त्वंहोलिबालिशैः अतस्त्वांपूजयिष्यामिभूतेभूतिप्रदाभव ७ इत्युक्त्वादिनराज्योस्तुसंधौतान्ज्वालयेन्नरः पूजयेच्चविशेषेणसर्वारिष्टोपशांतये ८ एवंहोलिकापूज्यद्वितीयेदिवसेनरैः प्रवृत्तेमधुमासेतुप्रतिपद्युदितेरवौ ९ कृत्वाचावश्यकार्याणि सतर्प्यपितृदेवताः वदयेद्धोलिकाभूमिंसर्वदुःखोपशांतये १० यदिताभिसुरेंद्रेणब्रह्मणाशंकरेणच अतस्त्वंपाहिनोदेविभूतेभूतिप्रदाभव ११ वृत्तेतुषारसमयेसितपंचदश्यांप्राप्तेवसंतसमयेसमुपस्थितेच्च संप्राप्तचूतकुसुमंसहचंदनेनसत्यंहिभिल्लपुरुषायसमासुखीस्यात् १२ चूतमंजरवसंतस्यमाकंदकुसुमंतव सचंदनंपिबाम्यद्यसर्वकामार्थसिद्धये १३ चैत्रमासिमहाव्याध कृष्णेतुप्रतिपद्दिने यस्तत्रस्नपयेत्स्पृष्ट्वास्नानंकुर्यान्नरोत्तमः १४ तनस्युदुरितंकिंचिन्नाधयोव्याधयस्तदा एतत्तद्दिननीत्वातंतश्चाग्नेदिनत्रय १५ नानोत्सवंतुगीताद्यैर्नीत्वाचैवंततःपरं पंचम्यांचैत्रकृष्णेतुसौभाग्यद्रव्यमंगलैः १६ स्नात्वाकिंशुकपुष्पादिकृतरंगैःशुभावहैः चित्रितानिहिवासांसिपरिधायनरोत्तमैः १७ नानासुगंधद्रव्यादिचूर्णहीत्वाचपरस्परं एकैकोपरिसिंचेच्चमहामांगल्यदायकं १८ वसंतोद्भवपुष्पैश्चपूजयेद्वधुनायकं नानादानानिदेयानिनिजमांगल्यहेतवे १९ मिष्टान्नैर्भोजयेद्विप्रान्स्वयंचापिसुरुद्यजनैः भोक्तव्यंतुवसंततोपंचम्यामानवैःसुखम् २०

हत्चैत्रेमासीति १५ १५ सौभाग्यद्रव्यमंगलैः सुगंधतैलहरिद्रादिभिः १६ किंशुकपुष्पादिकृतरंगैःकिंशुकः पालाशः तस्यपुष्पाणिआदिशब्देनचूर्णक्षारादिभिः १७ १८ नानादानानिभक्ष्यभोज्यसौभाग्यपदार्थादीनि १९ २० ५ ५

वसंतनौ वसंतोद्भवपुष्पैः रामचंद्रस्यपूजनाद्वसंतपंचमीतिनरैः प्रोच्यतेपरंत्वियंरंगेनखेलनाद्रंगपंचमीविज्ञेया २१ २२ तस्यरामचंद्रस्यसर्वमासेषु-
पूर्वोक्तमेवपूजनवर्ततेवान २३ २४ प्रतिपक्षजाशुक्लकृष्णजा २५ २६ मंदारःकल्पवृक्षजः २७ दमनः भाषायांदवणः सिंहिरिंगणीपुष्प२८
मोदककरण स्फोटितानांतंदुलानांपिष्टंसूक्ष्मंविधायच तत्प्रमाणंतत्रजलंस्थाप्यंचुल्ल्यांतुतत्पचेत् अत्यमत्यंविकीर्याथमेलयित्वाघनंपचेत् घ
नीभूतेततोत्तार्यतत्पर्पट्यांस्फुयुक्तिनः पूरणंचविधायाथसिनाश्रीफलजंतथा त्रिवृत्प्रांतामर्धचंद्रसमानांकारयेत्सुधीः एवंशष्कुलयःकार्याः पाच्याः स्वेद
नपाचके एवंचमोदकाकार्याः लड्डुकान्अनेकधामताः प्रसिद्धाः सर्वलोकेषुविस्तरान्नात्रचोच्यते मंडोबहुविधः तत्रकिंचित्कर्तव्यतामाह भर्जिततंदुलमुद्गा-

वसंतपंचमीनाम्न्यतुःसाप्रोच्यतेनरैः तस्यांदत्तंहुतंजप्तंसर्वकोटिगुणंभवेत् २१ ऋतुःप्रोक्तामयाश्रेष्ठापूर्वसापंचमीतिथिः
चैत्रमासेकृष्णपक्षेसर्वपापप्रणाशिनी २२ कर्कशउवाच यस्त्वयारामचंद्रस्यमधौप्रोक्तुपूजन तस्यसर्वेषुमासेषुपूजनवर्त-
तेनवा २३ ब्रूयाद्विममसंदेहःछिंधित्वंद्विजसत्तम शंभुरुवाच सर्वेष्वपिचमासेषुकार्यरामस्यपूजनं २४ तेषुसर्वेषुमासेषु
नवमीप्रतिपक्षजा तस्यामुपोषणंकृत्वाविशेषाद्रामपूजन २५ कार्यंतानोपचारैर्हिगीतवाद्यादिमंगलैः कृत्वाजागरणंरात्रौ
प्रभातेऽर्च्यपुनश्चत २६ नानानवविधैःपुष्पैःपूजयेद्रघुनायक जातीचंपकमंदारतुलसीसुनिमालती २७ दमनःकेतकीसिंही
पुष्पाणानवकस्मृत तथानवविधोदेयानैवेद्योराघवायहि २८ मोदकोलड्डुकोमंडोवटकःफेनिकाशुभा वरान्नमोदनःशाक
पायसंनवकंस्मृतम् २९ नांसमानंस्थूलचूर्णंचतुर्दशगुणितजलमध्येपाचयेत् पाचनसमयेएवंहिंगुसैंधवधनिकासुंठीमरीचंपिपली एतानि
क्षिप्त्वापक्वंचुल्हांसकाशादधःउत्तार्यपृथुपात्रमध्येढालयेदयमद्यगुणोमंडः एवंगोधूमादीनामपिभवंतिमंडाः वटकाः माषादीनांतैलपक्वाःप्रसिद्धाः फेनि
कामाह गोधूमानांधूमसींचकिंचित्लवणसंयुतांजलेनबहुशोमर्द्यकुट्यकुट्यपुनःपुनः हस्तेनावर्तिकंचैवघृतमभ्यदमत्रके स्थाप्यंपश्चाच्चुधूमस्याःसूक्ष्मसूत्र
णिकारयेत् हस्तेघृतंलापयित्वायथासूक्ष्मंभवेत्तुतत् यथाकृत्वाचहस्तेतुवेष्यसूत्राणितानितु पश्चात्किंचिद्घृतंवंकृत्वातत्तेघृतेपचेत् नृणांमुष्टिनावर्थस्या

लोशातकिजालवत् वृथाधातुकरीवायस्लेष्मजित्तारफेनिका इति वरान्नंपंचपक्वान्नानि ओदनंभातः शाकंविधिधशाकान्नं पायसंघृतसिद्धं एवंनवविधोनैवेद्यः
२९ ३० प्रतिपक्षेचैत्रशुक्लनवमीमारभ्यद्वादशमासेषुशुक्लकृष्णपक्षेएवं पूर्वोक्तप्रकारेणरामनवमीव्रतंकर्त्तव्यंवाप्रतिमासंशुक्लपक्षेकारयेत् ३१ ३२

एवंकृत्वापूजनंहितोब्राह्मणभोजनं कृत्वास्वयंतुभुंजीतस्वबन्धुजनैःसह ३० एवंव्रतंनरैःकार्य्यंप्रतिपक्षेहिसर्वदा अथवाप्रतिमासंहिसितपक्षेचकारयेत् ३१ रामजन्मातिथौशुक्लनवम्यांयेनराःसदा कुर्वंत्युपोषणंरात्रौयेकुर्वंतिहिजागरं ३२ नानोपचारैःश्रीरामंयेर्चयंतिचतद्दिने जीवन्मुक्ताश्चतेज्ञेयास्मृतातेवैष्णवोत्तमाः ३३ एवंमयाकर्कशरामपूजनंसर्वेषुमासेषुनिवेदितंतव एवंप्रकारेणहियेद्विजोत्तमाः कुर्वंतितेश्रीहरिलोकवासिनः ३४ इतिश्रीभविष्योत्तरपुराणेअयोध्यारघुचैत्रमाहात्म्येहोलिकाख्यानंतथामासपूजनविस्तारोनामत्रयोविंशोऽध्यायः २३ ७ शंभुरुवाच तस्मात्सर्वप्रयत्नेनमासिमासि नरोत्तमैः प्रतिपक्षेपिवाकार्यंसीताराघवपूजनं १ प्रतिमासिसितेपक्षेनवम्यांचनरोत्तमैः सर्वथानाश्नमश्नीयाद्भुक्त्वाचाद्यायणंचरत् २ एवंव्याधत्वयापृष्टंयत्तच्चकथितंमया सविस्तरंकिमन्यत्तेवाच्छास्तिश्रवणेवद ३ कर्कशउवाच भोविप्रत्वन्मुखात्सर्वंश्रुतंविस्तरतोमया इदानींहीनजातिस्थत्वमामुद्धर्तुमर्हसि ४ शंभुरुवाच आगच्छत्वसहैवाद्यमयायोध्यापुरींप्रति सरयूस्नानमात्रेणमधोपापाद्विमोक्ष्यसे ५ इत्युक्त्वाकर्कशंशंभुस्तत्रःप्रोवाचराक्षसम् भोराक्षसत्वमत्रैवमासमात्रंस्थिरोभव ६ अयोध्यायाम वेशश्चराक्षसानांनविद्यते अतोहमधुमासेहिस्नात्वातेनपथापुनः ७ यदागच्छामिकांचीत्वांचोद्धरिष्याम्यहंतदा मासदेहात्कृतेचित्तेशपथेनब्रवीम्यहं ८ यत्पापंब्रह्महत्यायास्तथागोपतिनिंदनात् नोद्धृत्यत्वांहिगच्छामितर्हितन्मयितिष्ठतु ९ मद्यपानाच्चयत्पापं हैमस्तेयादिकंचयत् नोद्धृत्यत्वांहिगच्छामितर्हितन्मयितिष्ठतु १० यत्पापंभ्रूणहत्यायास्तथाचैत्यमज्जनात् नोद्धृत्यत्वांहिगच्छामितर्हितन्मयितिष्ठतु ११

३३ ३४ इतिरीकायांत्रयोविंशोध्यायः२३ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

१२ परितश्चासमंतात् १३ १४ १५ १६ मातंगःगजः १७ १८ १९ काश्यांकाशीयात्रानिमित्तंकाशीवासनिमित्तंविघ्नंव्या

इत्यादिश्रापथैस्तंहिराक्षसंहर्षयन्द्विजः यावत्पश्यतिसर्वत्रनावज्ञातंहिकौतुकं १२ व्याधायचैत्रमासस्यमाहात्म्यस्योपदे
शतः तरवःफलिनोजाताःपरितोदशयोजन १३ पत्रैःपुष्पैर्विनम्राश्चस्कंधिपवनावबुः नद्यस्तोयेवहत्यश्वन्नृतुर्बाहिणोव
ने १४ तंदृष्ट्वाकर्कशश्चापिचैत्रमाहात्म्यकीर्तनात् दुर्वासकवनजातंचैत्रश्रेष्ठममन्यत १५ ततस्तोहित्रयस्तस्माद्दूनान्मार्गेण
निर्गताः शनैःशनैरयोध्यायाःपरिपश्यन्वनस्थलीं १६ तावच्छब्दोमाहान्जातःसिंहमातंगसंभवः यावन्मत्तेनुमातंगःपृ-
ष्ठेधावंश्चकेसरी १७ एवंतौशंभुसान्निध्यप्राप्तौकलहकारिणौ मार्गरोधकरौदुष्टौतौदृष्ट्वाशंभुरब्रवीत् १८ पश्यकर्कशविघ्
नंचैत्रस्नानेपदेपदे संभवंतीतिवेबुध्वाचैत्रस्याननलंघयेत् १९ काश्यांविवाहेगीतायागयायांरामचिंतने चैत्रस्नानेमहादा-
नेविघ्नानिसंभवंतिहि २० एवंवदंतिविप्रेंद्रेतौदुष्टौकरिकोहलौ चैत्रनाम्नश्चवात्सूर्यजन्मस्मृतिरभूच्छुभा २१ ततस्तौत्राद्विग्राही-
तिरुक्त्वादीर्घमहारवं शरणंद्विजवर्यायजग्मतुःशंभुशर्मणे २२ सोपिशंभुश्चताभ्यांहिस्पृष्टस्तत्कृपयान्वितः किमर्थंदुष्टजा नि-
हिप्राप्तौतत्कथ्यतांमम २३ इतिविप्रवचःश्रुत्वाकेसरीवाक्यमब्रवीत् सतौरामेश्वरक्षेत्रेपूर्वजन्मन्यहंद्विजः २४ निंदकःसर्वध-
र्माणांपाखंडोक्त्येकतत्परः कदाचिच्चैत्रमासेतुतत्रश्रीरामसन्निधौ २५ तीर्थेजनसमूहंचश्रुत्वापौराणिकींकथां पौराणिकेन
कथितांचैत्रमाहात्म्यसूचिकां २६ कृत्वाभिंदनंचाहंवारंवारंपुनःपुनः तन्मे तृकृतंनिंदनंचकाश्यिंद्विग्रस्तपस्थितः २७ शुश्रा
वसकलदुष्टेनशप्तोस्म्यहंतदा क्रूरांजातंत्वरंगच्छयदाचैत्रेशकीर्तन २८ भविष्यतिमहारण्येशापस्यांतस्तदेतिच एवंप्रो
क्तंमयासर्वंपूर्वजन्मानुकीर्तनम् २९

ध्यर्दितोभवति विवाहेकलहादिकंगीतायांगीतापाठनियमेगयायांसविधिपंचचत्वारिंशद्धेदिस्नाद्
करणाग्रहेरामचिंतनेरामनामस्मरणेमहादानेगोभूशय्यादिदानेविघ्नाः संभवंति २० २१ २२ उवाचेतिशेषः २३ २४ २५ २६ २७ २८
२९

तेनशापेनजातोहंकेसरीमयकारकः चैत्रेरामश्चवाज्ञातापूर्वस्मृतिरनुत्तमा ३० इदानींरक्षमांविप्रत्वंचैतत्सिंहदेहतः-
इतिसिंहस्यवृत्तंतुज्ञात्वाकरिणमब्रवीत् ३१ कस्माच्चमातंगगतोसिदुष्टजातोवदस्वाद्यमहाघसंघात् सचापिमातंगवरःस्व
मस्तवृत्तंनिजंचाकथयच्चचीर्णं ३२ इतिश्रीभविष्योत्तरपुराणेऽयोध्याखंडेचैत्रमाहात्म्येकरिसिंहाख्यानंनामचतुर्वि
शोऽध्यायः २४ ७ मातंगउवाच शृणुविप्रप्रवक्ष्यामिपूर्ववृत्तंमयाकृतं रामनाथपुरेचाहंकावेर्याउत्तरेतटे १ वि
प्रःपरमदुर्वृत्तःसर्वशास्त्रपराङ्मुखः लक्ष्मीमदभराक्रांतःपण्यस्त्रीभोगकारकः २ एकदासुहृदंनाहंभोजनार्थंनिमंत्रि
तः श्राद्धाहंमधुमासेहिशुक्लेऽमानवमीदिने ३ मयाभुक्तंसुहृद्गेहेनवम्यांहिद्विजसत्तम तेनपापेनजातोस्मिकरिजातोनसंशयः
४ सर्वदाप्रतिमासेपिनवम्यांनहिभोजनं कार्यंविशेषतोरामनवम्यांनिंदितंचतत् ५ इदानींनहिजानामिकेनपुण्येनतत्र-
वै संगतिश्चवनेजातासर्वेषांपरमार्तिदम् ६ इतिस्मयवचःश्रुत्वाशंभुर्ध्यानंविचारयन् ज्ञात्वामातंगपुण्यंतुप्रोवाचकरिणं
द्विजः ७ शृणुमातंगवक्ष्यामियत्पुण्यंचत्वयाकृतं पूर्वजन्मनितत्सर्वंयेनमेसंगतिर्वने ८ जानात्यामुद्धरिष्यामिमाचिंताकुरु
सर्वथा रामनाथपुरेरम्येकावेरीतटशोभिते ९ रामायणकथाचैत्रेश्रुत्वापूर्वत्वयाक्षण तेनपुण्येनमेजातासंगतिश्चाद्यतेवने १०
इतिविप्रेणकथितंकरिपुण्यंपुराकृतं श्रुत्वासिंहोपिपप्रच्छतंजपुण्यंद्विजायसः ११ सोपिशंभुःक्षणंध्यात्वाज्ञात्वाकेसरिणाकृ
तं पूर्वजन्मनियत्पुण्यंतत्तस्मैप्रोक्तवान्द्विजः १२ रामेश्वरेमहाक्षेत्रेपुराश्रीनवमीदिने रामतीर्थंत्वयास्नानंदृष्टोरामेश्वरःशिवः
१३ तेनपुण्येनतेजातासंगतिर्ममकानने इदानींशृणुसिंहत्वंशृणोतुचकरीमहान् १४ १० ११ १२ स्नानेस्नानंकृतम् रा

मेश्वरःत्वयादृष्टःननुस्थाणुमूर्तेःस्वप्रसादात् स्नानार्थंरामतीर्थेगमनमनुचितमित्युक्तेभोगमूर्तेःसर्वमुचितमिति १३ १४ ७

अथाहंमधुमासेहिस्नात्वानेनपथापुनः यदागच्छामितांकांचीयुवामुद्धारयाम्यहं १५ मासंदेहोत्रकर्तव्यः शपथैःप्रब्रवीम्यहम् संतोषार्थंयुवाभ्यांहिप्रोच्यतेशपथामया १६ परस्त्रीगमनात्पापयत्स्मृतंनिंदितंमहत् युवानोद्धृत्यगच्छामितर्हिनन्मयिनिश्चतु १७ बालस्त्रीघानजपापंतथामित्रवधादिकं युवानोद्धृत्यगच्छामितर्हिनन्मयिनिश्चतु १८ ब्रह्मस्वहरणात्पापयत्स्मृतंमानृनिंदनात् युवानोद्धृत्यगच्छामितर्हिनन्मयेतिश्चतु १९ इत्युक्काद्विजवर्यस्तुस्त्रियाभिन्नेनसंयुतः करिसिंहोवनेस्थाप्यगच्छन्मार्गेशनैःशनैः २० ददर्शान्यपथायांतश्रेष्ठकार्पटिकोत्तमं वहंतरामलिंगार्थंश्रेष्ठंभागीरथीजलं २१ शंभुःपप्रच्छतंनत्वानम्रःकार्पटिकोत्तमं कुतःसमागतंविप्रगम्यतेक्वेतिनद्रुतं २२ कार्पटिकउवाच प्रयागादागतंविद्धिमांत्वंभूसुरसत्तम मधुमासेवगाहार्थंमयोध्याप्रतिगम्यते २३ इदानीत्वंनिजवृत्तंवदब्राह्मणसत्तम कुतःसमागतंचात्रगम्यतेक्वाधुनावद २४ इतितद्वचनंश्रुत्वाशंभुःप्रोवाचतंतदा शिवकांच्याःसमायातमयोध्याप्रतिगम्यते २५ चैत्रमासेवगाहार्थंसत्यंतेकथितंमया इतिशंभुवचःश्रुत्वापुनःकार्पटिकोत्तमः २६ पप्रच्छद्विजवर्यायकौतुकाविष्टमानसः शिवकांच्याशंभुनामाकश्चिद्विप्रोस्तिभोद्विज २७ तत्तस्यवचनंश्रुत्वापुनःशंभुस्तमब्रवीत् बहवःशंभुनामानिवर्त्ततेद्विजतन्महि २८ कार्पटिकउवाच गार्ग्यगोत्रोद्भवंदिपुत्रसूर्योपनामकं ब्राह्मणशंभुनामानजानीषेत्वनवावद २९ एवमहाकार्पटिकेणसर्वंगोत्रोपनामादिकमादरेण प्रोक्त्वशांतश्चसभूसुरोपिज्ञात्वानिजवृत्तमथावदत्तं ३० इतिश्रीभविष्योत्तरपुराणेअयोध्यारंहेचैत्रमाहात्म्येकार्पटिकशंभुसंवादोनामपंचविंशोऽध्यायः २५ ७ शंभुरुवाच भोभोकार्पटिकश्रेष्ठकिमर्थंनहिपृच्छसि तद्वदस्वसविस्तारमाशंकांकुरुचान्यहि १

२६ २७ २८ २९ निजंसर्वंनामकार्पटिकोक्तोयः शंभुब्राह्मणः सोऽहमेवेतिज्ञात्वा ३० इतिटीकायांपंचविंशोऽध्यायः २५ ७ १

कार्पटिकउवाच शृणुविप्रप्रवक्ष्यामियदर्थंपृच्छ्यतेत्वया यदाहंगतवान्गंगासागरंद्रष्टुमादरात् २ सीताकुंडस मीपेहिदेशेकेकटनामके दृष्टोहमार्गमध्येचपिशाचेनोग्ररूपिणा ३ माहतुंनिकटेप्राप्यतदृष्ट्वाहंनदाद्विज श्रीरामकीर्त नंदीर्घंकृतवान्भयकंपितः ४ कीर्तनाद्रामचंद्रस्यसपिशाचःपलायन मत्तःकृत्वादूरदेशेस्थित्वाशृण्वावकीर्तनम् ५ तस्मा ज्ज्ञात्वापूर्वजन्मस्मृतिस्तस्यशुभावहा त्राहित्राहीतिमांप्राहमयापृष्टपुनश्चसः ६ कस्मात्पिशाचदेहत्वंजातंतद्वदसत्वरं इति मेवचनंश्रुत्वापिशाचःप्राहमांपुनः ७ काचीपुर्यांद्विजश्चाहंधुंडिनामापुरास्थितः नान्नदानंमयापूर्वंकृतंस्वल्पमपिक्वचित् ८ तस्मात्पिशाचदेहत्वप्राप्तकार्पटिकोत्तमं इतितस्यवचःश्रुत्वापुनःप्रोक्तःसवैमया ९ कथंपिशाचयोन्यास्तुतेमुक्तिर्भविष्यति ततःपुनःसमाप्राहयदिमेतनयःशुचेः १० चैत्रदर्शममोद्देशाद्यन्नदानंकरिष्यति भविष्यतिममोद्धारस्तत्क्षणान्नात्रसंशयः ११ इतितद्वचनंश्रुत्वापुनःप्रोक्तःसवैमया वर्ततेकुतस्तेहिकिन्नामावदमांप्रति १२ ततस्तेनयथाप्रोक्तंगार्ग्यगोत्रादिकंचयत् तत्सोक्तंचमयासर्वंनिकटेतवभोद्विज १३ पिशाचंहिपुनश्चाहमुक्त्वास्तद्वदाम्यहं रामेशार्थंभोपिशाचनीय तेजान्हवीजलम् १४ मयाकरंडमध्येहियदागच्छामिदक्षिणां दिशंकालेनकाच्याहिप्रवेक्ष्यामियदातदा १५ तवपुत्रायतद्वन्हिकथयिष्याम्यहंतव इतिमद्वचनंश्रुत्वासंतोषपरमंगतः १६ पिशाचःप्राहमाविप्रःस्तुत्वानत्वापुनःपुनः अवश्यमेववक्तव्यंमद्वृत्तममसूनवे १७ यथाहृष्टत्वयाचात्रयथाप्रोक्तंमयातव अन्यच्चकथ्यतांतस्मैममपुत्रायसादरम् १८ मधुदर्शे न्नदानस्यमहिमाश्रूयतेदिवि अतस्त्वंहिममोद्देशादन्नदानमथोकुरु १९

२० २१ २२ २३ लिंगैर्लक्षणैः २४ कर्कशास्त्र्येनभिक्षुणा २५ २६ भवःजन्म २७ पांथःकार्पटिकःदंपतीस्त्रीपुं
सौसभार्यः शंभुः २८ इतिरीकायांषड्विंशोऽध्यायः २६ ७ १ २ ३ ४ ५ हाटकेनसुवर्णेनघटि-

एवमुक्तापिशाचैःसशपथोमांचकारह नभूषेस्मरणंकृत्वाममपुत्रायचेद्विज २० भविष्यतिवृथासर्वायात्रातवमहा
मते इतितद्वचनंश्रुत्वासात्वयित्वाचतंपुनः २१ निर्गतोस्मिमधोस्नातुमयोध्यागंतुमादरात् स्नात्वायोध्यापुरीमध्येचै
त्रस्नानंमहाफलम् २२ यदागच्छामिनाकांक्षीनदातस्मैवदाम्यहं अतएवमयापृष्टतवशंभुर्द्विजोत्तमः २३ गार्ग्यगोत्रा
द्विभिर्लिंगैर्वर्ततेचेद्दुस्त्यजा इतिशंभुपितुर्वृत्तज्ञात्वामूर्छांगतस्तदा २४ आश्वासितश्चभिक्षुणाविप्रोवाचतंपुनः भो
भोकार्पटिकश्रेष्ठनम नास्तिनराधमः २५ यस्त्वयापृच्छतेशंभुःसोहंविद्मिनसंशयः मयापुत्रेणन कृतं स्वपितुर्मोक्षदा
यकं २६ अन्नदानादिकंकर्मधिग्धिग्मेहिवृथाभवः इदानींतववक्ष्याद्विदास्याम्यन्नमधोपितुः २७ एवंशंभुःकार्पटि
कायचोक्त्वाऽयोध्यारम्यांदूरतोवैददर्श प्रणम्यस्तौदंपतीपांथभिक्षुस्ततःशंभुश्चावदत्कर्कशंसः २८ इतिश्रीभविष्यो
त्तरेपुराणे अयोध्याखंडेवैष्णवमाहात्म्येअयोध्यादर्शननामषड्विंशोध्यायः २६ ७ शंभुरुवाच पश्यपश्यमहा-
भिक्षुमहायोध्यापुरींशुभाम् यस्यांस्नातुंसमायांतादृश्यंतेकोटिशोजनाः १ जनौघानांध्वनिश्चायंश्रूयतेमेघशब्दव
त् नानाध्वजपताकाश्चदृश्यंतेचेंद्रचापवत् २ तथावाद्यध्वनिश्चायंश्रूयतेहिमनोहरः अग्निहोत्रादिधूमोघेव्याप्तंपश्यन
भोगणं ३ कैलासगिरिसाम्यानिपश्यसौधानिकर्कश नवप्रनोलीपरिखावलयीकृतमेखलाम् ४ उत्तुंगहर्म्यविलसत्स
ताकाशतसंकुलां अभ्रंलिहमहासौधसुवर्णकलशोज्वलां ५ पश्यायोध्यापुरींश्रेष्ठांसरयूनीरनादितां हाटकाद्युदितैरत्नरव
चितैर्याकपाटकैः ६ तैः रत्नखचितैःरत्नजटितैःकपाटैःसंवृतैर्नानाबंधैःविराजितैरुद्घाटितैश्चास्तेरंस्तेच्छयाऽनिषंतीवयात्रायोध्यालप्स्यतेइत्युत्त
रेणसंबंधः ६

जनान् स्फरनेस्फरननिमित्तंआस्फंतीवलस्यनइति ७ अधः कृताधोभुवनांअधःकृतानि अधोभुवनानि ययातांअमरावतींस्वर्गं ८ तिरोहिताअं

स्वंवृतैर्विवृतैःस्वैरमुन्मिषंतीवलस्यने दोधूयमानैर्मरुतापताकांचलचित्रकैः ७ आह्वयंतीवसुरतोलस्यनेपथिकान्-
जनान् अधःकृताधोभुवनाजेतुमेकामरावतीम् ८ प्रासादमूलव्याजेनसन्नद्धेवाद्यलस्यने पवित्रस्मिन्महाक्षेत्रेनिव-
सतितिरोहिताः ९ ब्रह्मशक्तिरिभिःसर्वदेवास्तत्रऋषयोमलाः कुबेरस्पर्धयायत्रचिन्वंतिचरुसंचयान् १० दातुंभोक्तुंसुवज
नाःस्वधर्मनिरताःसदा येषांप्रक्षालयंतिस्मचरणान्वासवादिकाः ११ तेहिजाःकस्यनोवंद्यायेयोध्यानगरीस्थिताः कृमि-
कीटपतंगानांविनाज्ञानसमाधिभिः १२ अत्रनिर्वाणपदवीस्फलभाकेनवर्ण्यते इंद्रनीलमहातुंगप्रतोलीचारुदर्शना १३
रामचंद्रस्यदिव्योयप्रासादस्तुंगतोरणः प्रतोलीयस्यघटिताकाश्मीरैरुपलैरलं १४ सीतायाश्चमहानेषप्रासादोरत्नतोर
णः नानारत्नैर्मंडितश्चहेमस्तंभविराजितः १५ स्फाटिकैरुपलैश्चित्रसरयूतीरसंस्थितः रामतीर्थसमीपेत्रसीतारामस्य
संदरः १६ प्रासादोविमलोभातितप्तकांचननिर्मितः पताकाभिर्विचित्राभिःकलशैश्चविराजितः १७ उत्तुंगाबून्नद्
रत्नकुंभः प्रवालवैडूर्यनिबद्धभूमिः हेमप्रतोलीरचितःसएषप्रासादवर्योस्तिहिलक्ष्मणस्य १८ चातुर्यंयत्रविभातिसकलं
विश्वकर्मणः सोयंभरतराजस्यप्रासादोहेमतोरणः १९ तथादेदीप्यमानोयंरत्नभित्तिविनिर्मितः प्रासादोदृश्यतेरम्यः
शत्रुघ्नस्यशुभावहः २० स्फटिकैर्भित्तिभिश्चित्रःप्रोच्चैःकनकरेखितः प्रासादोवायुपुत्रस्यदृश्यतेयंमहाशुभः २१ एव-
मुक्त्वाकर्कशेनपल्याकार्पटिकेनच सहितश्चनदाशभुक्तांपुरींमविवेशसः २२ रामतीर्थंततोगत्वाकृत्वाक्षौरादिकंवि-
धिम् उपोष्यदिनमेकंहितीर्थश्राद्धंचकारसः २३

तर्हिताः ९ १० वासवादिकाःइंद्रादयः११ १२ प्रतोलीग्रामाभ्यंत

रमार्गः १३ प्रासादः राजावासयुक्तं काश्मीरे रुपलैःपाषाणैः १४ १५ १६ १७ १८ १९ २० कनकसुवर्ण २१ २२ २३

रामचंद्रंचसंपूज्यबंधुसीतांजनीसुतैः सहितंब्राह्मणांस्तर्प्यचैत्रस्नानंचकारसः २४ अमावास्यांशुभांचैत्रप्राप्तांज्ञात्वा द्विजोत्तमः मुक्त्यर्थंस्वपितुश्चैकेत्यन्नदानंद्विजायहि २५ तच्चैत्रमासेनिशिनाथसंक्षयेदत्तंपितुर्यच्छुभदंमनोहरं विप्रेण चान्नंपथिकस्यवाक्यतस्तस्मात्सिशाचःसुरसद्मनिस्थितः २६ इतिश्रीभविष्योत्तरपुराणेऽयोध्याखंडेचैत्रमाहात्म्येऽयोध्यावर्णननामसप्तविंशोऽध्यायः २७ ७ नृसिंहउवाच अयोध्यायांततःशंभुःकृत्वाचैत्रवगाहनं उद्यापनविधिंचापियथोक्तंचचकारसः १ कर्कशोपिमधौस्नात्वामुक्तापापौघभूधरं अयोध्यानगरीमध्येसाधुवृत्तावसच्चिरं २ श्रीरामचिंतनंकुर्वन्निनायापुश्वसक्षयं ततःप्रापहरेर्लोकमयोध्यामरणेनसः ३ शंभुश्चापिमधौस्नानंकृत्वाकांचीपुरींपुनः गंतुप्रतस्थेश्रीरामनत्वायोध्यापुनःपुनः ४ ययौपूर्वेणमार्गेणयत्रतौकरिकोहलौ स्थापितौशपथैःकृत्वातत्रशंभुःसमागमत् ५ दत्वादिनद्वयंपुण्यमुभाभ्यांमधुमासजं नैजंकृत्वांजलौतोयंतयोर्मुक्तिंचकारसः ६ ततस्तौकरिसिंहौहिदिव्यमाल्यानुलेपनौ दिव्यंविमानमारुत्यविष्णुलोकंगतावुभौ ७ ततोऽग्रेह्विजवर्योपियत्रामार्गेणभार्यया यत्रासराक्षसःपूर्वस्थापितःशपथैर्वने ८ तदृक्षाराक्षसःश्रेष्ठभार्यांप्राहद्विजोत्तमः अयिचंद्राननेरम्येशृणुमेवचनंशुभं ९ यात्वयाशीतलागौरीस्नातावैसरयूजले तस्यैकदिवसस्याद्य देहिपुण्यंशुभावहं १० राक्षसायहिमहाक्याद्गृण्हीष्वजलमंजलौ इतिशंभुवचःश्रुत्वापद्मनेत्राकृशोदरी ११ मालतीद्विजपत्नीसादद्दोपुण्यंनिजंतदा ततःसराक्षसःश्रेष्ठस्त्यक्तदेहमलीनस १२ दिव्यविमानमारुत्यनत्वाभार्यायुतंद्विजं दिव्यमाल्यांबरधरोहरिलोकंजगामसः १३ शंभुश्चापिप्रियायुक्तोमधुस्नानंविवर्णयन् ययौकांचीपुरींश्रेष्ठांजनान्वृत्तंन्यवेदयत् १४

५ ६ ७ द्विजवर्यःशंभुब्राह्मणः ८ ९ १० ११ मालतीनामकी १२ १३ वृत्तंस्वयात्राजन्यंवृत्तांतं १४ ५

१५ ह्योःपिशाचयोः दिनद्वयस्यपुण्यंददौनृतीयापिशाचिनीतस्याऽद्धार्थेभार्यांप्राहेत्युत्तरेणान्वयः १६ १७ १८ १९ २० आपृ-

नृसिंहउवाच भोपिशाचयथापृष्टंभवद्भिश्चकथानकं तत्सर्वंचमयाख्यातंराक्षसस्यकथादिकं १५ इत्युक्तानृहरिर्विप्रोगृहीत्वाचांजलौजलं ददौदिनद्वयस्याथपुण्यंचैत्रकृतंनिजं १६ ततःप्रोवाचभार्यांतुरम्येचद्रुप्रभेप्रिये यात्वयासीत्तलागोरीरभातासी ताकृतेवरे १७ तीर्थतस्याद्दिनैकस्यदेहिपुण्यंशुभानने पिशाचिन्येसमुद्धर्त्तुमाविचारोस्तुतेहृदि १८ इतिभर्त्तुर्वचःश्रुत्वारम्यंपंकजलोचना लक्ष्मीनाम्नीविप्रपत्नीददौपुण्यंनिजंतदा १९ ततःपिशाचास्तेसर्वेमुक्ताःशीघ्रंशुभावहाः निजरूपाणिवैप्रापुःप्रणेमुर्नृहरिंजवात् २० नत्वास्तुत्वापुनर्नत्वानृहरिंचप्रियायुतं आपृच्छ्याजग्मिरेसर्वेनिजंनिजंयथास्थल २१ नृहरिस्त्रिप्रियायुक्तोऽकंपनिसमाययौ चैत्रस्नानेनपुत्रश्चरामदासाभिधोमहान् २२ जातःपरमगंभीरःसीतारामैकमानसः माडव्यउवाच एवंराजन्मयाप्रोक्तंयत्पृष्टंचत्वयापुरा २३ तस्मान्मयातेनृपतेवगाहनंप्रोक्तंमधौतत्सरयूजलेशुभे पुत्रार्थमन्यन्नाहिकिंचिदस्तिवेदानंव्रतंपुत्रकरंजवेनहि २४ इतिश्रीभविष्योत्तरपुराणेत्र्ययोध्याखंडेचैत्रमाहात्म्येपिशाचोद्धरणंनामाष्टाविंशोऽध्यायः २८ सूतउवाच एवंरम्यंकथांतत्रमाडव्यश्चनृपायहि कथयामासतांसर्वांवायसावृक्षसंस्थिताः १ अष्टोत्तरशताःसर्वेश्रुत्वाज्ञानाःसिताःशुभाः राजहंसत्वमापन्नास्तेद्रष्टुःपुण्यकीर्तिना २ ज्ञात्वाश्रवणजंपुण्यंराजाहर्षसमन्वितः पूजयामासमाडव्यंनानाविभवमृगलैः ३ पुण्यकीर्तिस्ततःशीघ्रममात्यान्व्यतिसादरं सर्ववृत्तंनिवेद्याथप्रेषयामासतान्पुरं ४ राज्यसरक्षणार्थायततःसैन्येनसयुतः विसर्जयित्वामाडव्यमृषिसंघसमावृतं ५ ययौमार्गेणवैराजाचैत्रेःयोध्यापुरींप्रति दृष्ट्वायोध्यापुरीरम्यांसमहृष्टतनूरुहः ६ ननामराजायोध्यांतांपुण्यांवांछितदायकां विवेशनगरीमध्येपुण्यकीर्तिनृपोत्तमः ७

११ ज्ञांगृहीत्वेत्यर्थः २१ अत्रकंगोदानीगस्थचंद्रपुरं २२ २३ २४ इतिश्रीकाशीमाषाविंशोऽध्यायः २८ १ २ ३ ४ ५ ६ ७

शिबिकांक्रोशमात्रेतुमुक्त्वाशीघ्रंमहीपतिः रामतीर्थंततोगत्वास्नात्वाक्षौरादिकंविधिं ८ चकारनृपतिःसर्वंपौरोहित्य निवेदितं ततःस्नात्वाचैत्रमासेनिर्मलेसरयूजले ९ मासमात्रंपुण्यकीर्तिर्नित्यारामंदिनेदिने नानादानानिसर्वाणिचकारनृपसत्तमः १० चैत्रमासस्यसर्वंहिकृत्वाचोद्यापनादिकं विधिंसम्यग्यथाप्रोक्तंमाडव्येनपुराशुभ ११ ततःसैन्येनपल्यातुपुण्यकीर्तिर्नृपोत्तमः ययौस्वनगरंशीघ्रंध्वजसौधविराजितं १२ चंद्राननाराजपत्नीचैत्रस्नानाद्जीजनत् पुत्रवंशकरंश्रेष्ठयशकीर्तिमहत्तम १३ राजा राज्ञीसुत्रलाभाश्वरामुदमवापतुः एवंऋषिवराःसर्वेयत्पृष्टंचैत्रवर्णनं १४ तत्सर्वंत्वमयाप्रोक्तंकिमन्याश्रवणेस्पृहा भवतांवर्णनेब्रूत पुनश्चापिवदाम्यहं १५ ऋषयऊचुः साधुसाधुमहाश्रेष्ठसूतपौराणिकोत्तम चैत्रस्नानंत्वयासम्यक्कथितंविस्तरेणहि १६ इदानीम्प्रष्टुमिच्छामोवृद्धानारोगिणांमधो कथस्नानफलस्याद्धिकउपायोस्तितत्रहि १७ तत्वदमहाभागविस्तरात्सकलंवयत् सूतउवाच वारुणंचजलस्नानंमलस्नानंतथास्मृतं १८ मंत्रस्नानंतथाध्यानस्नानंपंचविधंस्मृतं मृत्तिकागोमयंभस्मपंचगव्यादिभिश्चयत् १९ समंत्रंचकृतंस्नानंवारुणंकथितंबुधैः विनामंत्रेणयत्स्नानंजलस्नानंचतत्स्मृतं २० मलक्षयोचार्द्रवस्त्रैर्मलस्नानंहिकथ्यते मंत्रस्नानंहितज्ञेयंयन्मंत्रैर्जलसिंचनं २१ ध्यानस्नानंतत्स्मृतंयच्चित्तेश्रीविष्णोर्यच्चिंतनभक्तियुक्तं एवंप्रोक्तंरुग्ग्रहवृद्धादिकानांस्नानेभेदःपंचधाभोमुनींद्राः २२ इतिश्रीभ० अ० चैत्रमा० पुण्यकीर्तिनृपतेःपुत्रलाभोनामैकोनत्रिंशोऽध्यायः २९ ऋषिरुवाच भोसूतशंभुविप्रेणकथितंकर्कशायत् त्रिजटाप्रीतयेस्नानंचैत्रस्नानाद्दिनत्रयं १ वदकात्रिजटाप्रोक्ताकस्मात्तत्प्रीतयेनरैः स्नानंदिनत्रयेकार्यंतत्सर्वंविस्तरेणहि २

ग्रग्रवृद्धादिकानांरोगिणांवृद्धानांआदिशब्देनका

ग्रग्रहादिभयस्थानस्थितानांकार्यांतरव्यग्राणां २२ इतिटीकायामेकोनत्रिंशोऽध्यायः २९ ७१ १ २

२ ४ ५ ६ ७ प्लवगैः वानरैः ८ ९ १० ११ १२ १३

सूत उवाच सम्यक्पृष्टमृषिवराः शृण्वंतुममभाषितं यदानिजपितुर्वाक्याद्रामचंद्रोवनेययौ ३ तदागोदावरीतीरात्पंचवट्यास्तुजानकी रावणेनहृतासाध्वीत्यशोकेस्थापितांहिंसा ४ तस्यासंरक्षणार्थायरक्षसांसहस्रशः प्रेरितारावणेनैवतासांमध्येस्थितांहिंसा ५ त्रिजटास्यासौम्यरूपाबिभीषणप्रियानुगा लंकायांरक्षितासाध्वीतयासा जानकीवने राक्षसानांसमूहोत्यघोरधर्षणजाद्भयात् सीतानुवर्तिनीचादुवचनैस्तामतोषयत् ७ ततोचिरेणकालेन राघवःप्लवगैर्युतः शिलाभिःसागरंबध्वास्थाप्यरामेश्वरंशिवम् ८ ययौलंकापुरींशीघ्रंकृत्वायुद्धंचदारुणम् रावणंबंधु पुत्रैश्चहत्वाराज्येबिभीषणं ९ स्थापयामासलंकायांततः सीतामपश्यत वन्हौदिव्यंतयादत्तंदक्षारामस्तदाशुभाम् १० ज्ञात्वातामंकमारोप्यपुष्पकस्थोरराजसः ततश्चजानकीवाक्याच्त्रिजटाप्रतिराघवः ११ उवाचवचनंशीघ्रंप्रसन्नमुखपंकजः त्रिजटेवचनंमद्यशृणुमंगलदायकम् १२ कार्तिकेमाधवेमाघेचैत्रेमासचतुष्टये स्नात्वाग्नेभिर्दिनस्नानंतत्प्रीत्यर्थंनरोत्तमाः करिष्यंतिहितेनैवकृतकृत्याभविष्यसि यैर्नरैस्त्रिदिनस्नाननकृतंपूर्णिमोर्ध्वतः १४ तेषामा सकृतंपुण्यंहरत्वंवचनान्मम अन्यच्चापिशृणुष्वत्वंदीयतेयोवरोमया १५ पादशौचमनभ्यंगंतिलहीनंचतर्पणम् तत्सर्वंत्रिजटेतुभ्यंनयाश्राद्धमदक्षिणं १६ इतिदत्वावरांस्तस्मैययौरामोनिजांपुरीम् तस्मात्तत्प्रीतयेस्नानंकर्तव्यंच दिनत्रयं १७ एवयःशृणुयाच्चैत्रमाहात्म्यंभक्तितत्परः धनपुत्रसुहृन्मित्रैःसर्वदासुखमश्नुते १८ मधोर्महित्वंपरमा दरेणश्रुत्वासमस्ताघचयस्यनाशम् प्रयातिसर्वात्मतयामुनीशोयथाग्नियोगेनपलालराशिः १९

१४ १५ १६ १७ १८ पलालराशिः शुष्कगलितपत्राणांराशिः १९ ७ ७ ७

२० २१ २२ इतिहरिकृष्णाविनिर्मितायांटीकायांदशोद्धायांचैत्रमाहात्म्येत्रिंशोऽध्यायः ३० ५ ५

श्रीचैत्रव्रतकथनंपरंनिभक्त्यायेवैनद्विजयतिवेष्णवानुवदंति तेसम्यक्व्रतकरणात्फलंलभंतेतत्सर्वकलुषविनाशनंलभंते २० अ
ध्यायात्पथमाद्यावदध्यायोविंशकःस्मृतः तावत्श्लोकेनवृद्धिर्हिह्याभ्याप्रोक्तानतःक्षयः २१ शतानिनवचैत्रस्यमाहात्म्येप
रमेशुभे श्लोकाःपापहराःप्रोक्ताः सर्वेवांछितदायकाः २२ इतिश्रीभविष्योत्तरपुराणेऽयोध्यारवंडेचैत्र
माहात्म्येत्रिंजटाख्याननामात्रिंशत्तमोऽध्यायः ३० इतिश्रीज्योतिर्वित्कुलावतंसवेंकटरामात्मजहरिकृ
ष्णाविनिर्मितेबृहज्ज्योतिषार्णवेऽष्टमेधर्मस्कंधेचतुर्थेमासस्तवकेचैत्रमासमाहात्म्यप्रथमं १ ५ ५
श्रीसीतारामचंद्रोजयति श्रीगुरुदत्तात्रयार्पणमस्तु श्रीगायत्र्यर्पणमस्तु श्रीशुभमस्तु ॥

यह चैत्रमासमाहात्म्य मुंबईमै पं० श्रीधरशिवलालके प्रज्ञायुक्त ज्ञानसागर छापखानेमैं छाप्यो सं०१९४४ शा०१८०९ मार्गशीर्षकृष्ण १३

इतिश्रीमासस्तबकेचैत्रमाहात्म्यंसंपूर्णं.